# bRihatpArAsharahorAshAstramh 51-60

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૫૧-૬૦

## Document Information

Text title : bRihatpArAsharahorAshAstram.h 51-60

File name : par5160.itx

Category : jyotisha, sociology_astrology, bRihatpArAshara

Location : doc_z_misc_sociology_astrology

Transliterated by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Proofread by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Latest update : November 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# bRihatpArAsharahorAshAstramh 51-60

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૫૧-૬૦

અથાઽન્તર્દશાધ્યાયઃ ॥ ૫૧॥

દશાબ્દાઃ સ્વસ્વમાનઘ્નાઃ સર્વાયુર્યોગભાજિતાઃ ।
પૃથગન્તર્દશા એવં પ્રત્યન્તરદશાદિકાઃ ॥ ૧॥

આદાવન્તર્દશા પાકપતેસ્તત્ક્રમતોઽપરાઃ ।
એવં પ્રત્યન્તરાદૌ ચ ક્રમો જ્ઞેયો વિચક્ષણૈઃ ॥ ૨॥

ભુક્તિર્નવાનાં તુલ્યા સ્યાદ્ વિભાજ્યા નવધા દશા ।
આદૌ દશાપતેર્ભુક્તિસ્તત્કેન્દ્રાદિયુજાં તતઃ ॥ ૩॥

વિધાત્ ક્રમેણ ભુક્ત્યંશાનેવં સૂક્ષ્મદશાદિકમ્ ।
બલક્રમાત્ ફલં વિજ્ઞૈર્વક્તવ્યં પૂર્વરીતિતઃ ॥ ૪॥

કૃત્વાઽર્કધા રાશિદશાં રાશેર્ભુક્તિં ક્રમાદ્ વદેત્ ।
પ્રત્યન્તર્દશાદ્યેવં કૃત્વા તત્તત્ફલં વદેત્ ॥ ૫॥

આદ્યસપ્તમયોર્મધ્યે યો રાશિર્બલવાંસ્તતઃ ।
ઓજે દશાશ્રયે ગણ્યાઃ ક્રમાદુત્ક્રમતઃ સમે ॥ ૬॥

અત્રાઽપરો વિશેષોઽસ્તિ બ્રવીમિ તમહં દ્વિજ ।
ચરેઽનુજ્ઝિતમાર્ગઃ સ્યાત્ ષષ્ઠષષ્ઠાદિકાઃ સ્થિરે ॥ ૭॥

ઉભયે કણ્ટકાજ્ જ્ઞેયા લગ્નપઞ્ચમભાગ્યતઃ ।
ચરસ્થિરદ્વિસ્વભાવેષ્વોજેષુઃ પ્રાક્ ક્રમો મતઃ ॥ ૮॥

તેષ્વેવ ત્રિષુ યુગ્મેષુ ગ્રાહ્યં વ્યુત્ક્રમતોઽખિલમ્ ।
એવમુલ્લિખિતો રાશિ પાકરાશિરુદીર્યુતે ॥ ૯॥

સ એવ ભોગરાશિઃ સ્યાત્ પર્યાયે પ્રથમે સ્મૃતઃ ।
આદ્યાદ્ યાવતિથઃ પાકઃ પર્યાયે યત્ર દૃશ્યતે ॥ ૧૦॥

તસ્માત્ તાવતિથો ભોગઃ પર્યાયે તત્ર ગૃહ્યતામ્ ।
તદિદં ચરપર્યાયસ્થિરપર્યાયયોર્દ્વયોઃ ॥ ૧૧॥

ત્રિકોણાખ્યદશાયાં ચ પાકભોગપ્રકલ્પનમ્ ।
પાકે ભોગે ચ પાપાઢ્યે દેપપીડા નમોવ્યથા ॥ ૧૨॥

પિણ્ડત્રિકદશાયાં તુ બ્રવિમ્યન્તર્દશાવિધિમ્ ।
પૂર્ણ દશાપતિર્દદ્યાત્ તદર્ધં તેન સંયુતઃ ॥ ૧૩॥

ત્રિકોણગસ્તૃતીયાંશં તુર્યાંશશ્ચતુરસ્રગઃ ।
સ્મરગઃ સપ્તમં ભાગં બહુષ્વેકો બલી ગ્રહઃ ॥ ૧૪॥

એવં સલગ્નકાઃ ખેટાઃ પાચયન્તિ મિથઃ સ્થિતાઃ ।
સમચ્છેદીકૃતાઃ પ્રાપ્તા અંસાશ્છેદવિવર્જિતાઃ ॥ ૧૫॥

દશાબ્દાઃ પૃથગંશઘ્ના અંશયોગવિભાજિતાઃ ।
અન્તર્દશા ભવન્ત્યેવં તત્પ્રત્યન્તર્દશાદિકાઃ ॥ ૧૬॥

---

## અથ વિંશોત્તરીમતેન સૂર્યદશાન્તર્દશાફલાધ્યાયઃ ॥ ૫૨॥

સ્વોચ્ચે સ્વભે સ્થિતઃ સૂર્યો લાભે કેન્દ્રે ત્રિકોણકે ।
સ્વદશાયાં સ્વભુક્તૌ ચ ધનધાન્યાદિલાભકૃત્ ॥ ૧॥

નીચાદ્યશુભરાશિસ્થો વિપરીતં ફલં દિશેત્ ।
દ્વિતીયદ્યૂનનાથેઽર્કે ત્વપમૃત્યુભયં વદેત્ ॥ ૨॥

તદ્દોષપરિહારાર્થં મૃત્યુઞ્જયજપં ચરેત્ ।
સૂર્યપ્રીતિકરીં શાન્તિં કુર્યાદારોગ્યલબ્ધયે ॥ ૩॥

સૂર્યસ્યાઽન્તર્ગતે ચન્દ્રે લગ્નાત્કેન્દ્રત્રિકોણગે ।
વિવાહં શુભકાર્યં ચ ધનધાન્યસમૃદ્ધિકૃત્ ॥ ૪॥

ગૃહક્ષેત્રાભિવૃદ્ધિં ચ પશુવાહનસમ્પદામ્ ।
તુઙ્ગે વા સ્વર્ક્ષગે વાઽપિ દારસૌખ્યં ધનાગમમ્ ॥ ૫॥

પુત્રલાભસુખં ચૈવ સૌખ્યં રાજસમાગમમ્ ।
મહારાજપ્રસાદેન ઇષ્ટસિદ્ધિસુખવાહમ્ ॥ ૬॥

ક્ષીણે વા પાપસંયુક્તે દારપુત્રાદિપોડનમ્ ।
વૈષમ્યં જનસંવાદં ભૃત્યવર્ગવિનાશનમ્ ॥ ૭॥

વિરોધં રાજકલહં ધનધાન્યપશુક્ષયમ્ ।
ષષ્ઠાષ્ટમવ્યયે ચન્દ્રે જલભીતિં મનોરુજમ્ ॥ ૮॥

બન્ધનં રોગપીડાં ચ સ્થાનવિચ્યુતિકારકમ્ ।
દુઃસ્થાનં ચાપિ ચિત્તેન દાયાદજનવિગ્રહમ્ ॥ ૯॥

નિર્દિશેત્ કુત્સિતાન્નં ચ ચૌરાદિનૃપપીડનમ્ ।
મૂત્રકૃચ્છ્રાદિરોગશ્ચ દેહપીડા તથા ભવેત્ ॥ ૧૦॥

દાયેશાલ્લભભાગ્યે ચ કેન્દ્રે વા શુભસંયુતે ।
ભોગભાગ્યાદિસન્તોષદારપુત્રાદિવર્દ્ધનમ્ ॥ ૧૧॥

રાજ્યપ્રાપ્તિં મહત્સૌખ્યં સ્થાનપ્રાપ્તિં ચ શાશ્વર્તામ્ ।
વિવિઆહં યજ્ઞદીક્ષાં ચ સુમાલ્યામબરભૂષણમ્ ॥ ૧૨॥

વાહનં પુત્રપૌત્રાદિ લભતે સુખવર્દ્ધનમ્ ।
દાયેશાદ્રિપુરન્ધ્રસ્થે વ્યયે વા બલવર્જિતે ॥ ૧૩॥

અકાલે ભોજનં ચૈવ દેશાદ્દેશં ગમિષ્યતિ ।
દ્વિતીયદ્યૂનનાથે ચ હ્યપમૃત્યુર્ભવિષ્યતિ ।
શ્વેતાં ગાં મહિષીં ગદ્યાચ્છાન્તિ કુર્યાત્સુખાપ્તયે ॥ ૧૪॥

સૂર્યસ્યાન્તર્ગતે ભૌમે સ્વોચ્ચે સ્વક્ષેત્રલાભગે ।
લગ્નાત્કેન્દ્રત્રિકોણે વા શુભકાર્યં સમાદિશેત્ ॥ ૧૫॥

ભૂલાભં કૃષિલાભં ચ ધનધાન્યવિવર્ધનમ્ ।
ગૃહક્ષેત્રાદિ લાભં ચ રક્તવસ્ત્રાદિલાભકૃત્ ॥ ૧૬॥

લગ્નાધિપેન સંયુક્તે સૌખ્યં રાજપ્રિયં વદેત્ ।
ભાગ્યલાભાધિપૈર્યુક્તે લાભશ્ચૈવ ભવિષ્યતિ ॥ ૧૭॥

બહુસેનાધિપત્યં ચ શત્રુનાશં મનોદૃઢમ્ ।
આત્મબન્ધુસુખમ્ ચૈવ ભ્રાતૃવર્દ્ધનકં તથા ॥ ૧૮॥

દાયેશાદ્વ્યયરન્ધ્રસ્થે પાપૈર્યુક્તે ચ વીક્ષિતે ।
આધિપત્યબલૈર્હીને ક્રૂરબુદ્ધિં મનોરુજમ્ ॥ ૧૯॥

કારાગૃહે પ્રવેશં ચ કથયેદ્ બન્ધુનાશનમ્ ।
ભ્રાત્રૃવગવિરોધં ચ કર્મનાશમથાપિ વા ॥ ૨૦॥

નીચે વા દુર્બલે ભૌમે રાજમૂલાદ્ધનક્ષયઃ ।
દ્વિતીયદ્યૂનનાથે તુ દેહે જાડ્યં મનોરુજમ્ ॥ ૨૧॥

સુબ્રહ્મજપદાનં ચ વૃષોત્સર્ગં તથૈવ ચ ।
શાન્તિં કુર્વીત વિધિવદાયુરારોગ્યસિદ્ધિદામ્ ॥ ૨૨॥

સૂર્યસ્યાન્તર્ગતે રાહૌ લગ્નાત્કેન્દ્રત્રિકોણગે ।
આદૌ દ્વિમાસપર્યન્તં ધનનાશો મહદ્ભયમ્ ॥ ૨૩॥

ચૌરાદિવ્રણભીતિશ્ચ દારપુત્રાદિપીડનમ્ ।
તત્પરં સુખમાપ્નોતિ શુભયુક્તે શુભાંશકે ॥ ૨૪॥

દેહારોગ્યં મનસ્તુષ્ટિ રાજપ્રીતિકરં સુખમ્ ।
લગ્નાદુપચયે રાહૌ યોગકારકસંયુતે ॥ ૨૫॥

દાયેશાચ્છુભરાશિસ્થે રાજસન્માનમાદિશેત્ ।
ભાગ્યવૃદ્ધિં યશોલાભં દારપુત્રાદિપીડનમ્ ॥ ૨૬॥

પુત્રોત્સવાદિસન્તોષં ગૃહે કલ્યાણશોભનમ્ ।
દાયેશાદથ રિષ્ફસ્થે રન્ધ્રે વા બલવર્જિતે ॥ ૨૭॥

બન્ધનં સ્થાનનાશશ્ચ કારાગૃહનિવેશનમ્ ।
ચૌરાદિવ્રણભીતિશ્ચ દારપુત્રાદિવર્દ્ધનમ્ ॥ ૨૮॥

ચતુષ્પાજ્જીવનાશશ્ચ ગૃહક્ષેત્રાદિનાશનમ્ ।
ગુલ્મક્ષયાદિરોગશ્ચ હ્યતિસારાદિપીડનમ્ ॥ ૨૯॥

દ્વિસ્ફસ્થે તથા રાહૌ તત્સ્થાનાધિપસંયુતે ।
અપમૃત્યુભયં ચૈવ સર્પભીતિશ્ચ સમ્ભવેત્ ॥ ૩૦॥

દુર્ગાજપં ચ કુર્વીત્ છાગદાનં સમાચરેત્ ।
કૃષ્ણાં ગાં મહિષીં દદ્યચ્છાન્તિમાપ્નોત્યસંશયમ્ ॥ ૩૧॥

સૂર્યસ્યાન્તર્ગતે જીવે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સ્વોચ્ચે મિત્રસ્ય વર્ગસ્થે વિવાહં રાજદર્શનમ્ ॥ ૩૨॥

ધનધાન્યાદિલાભ ચ પુત્રલાભં મહત્સુખમ્ ।
મહારાજપ્રસાદેન ઇષ્ટકાર્યાર્થલાભકૃત્ ॥ ૩૩॥

બ્રાહ્મણિપ્રયસન્માનં પ્રિયવસ્ત્રાદિલાભકૃત્ ।
ભાગ્યકર્માધિપવશાદ્રાજ્યલાભં વદેદ્ દ્વિજ ॥ ૩૪॥

નરવાહનયોગશ્ચ સ્થાનાધિક્યં મહત્સુખમ્ ।
દાયેશાચ્છુભરાશિસ્થે ભાગ્યવૃદ્ધિઃ સુખાવહા ॥ ૩૫॥

દીનધર્મક્રિયાયુક્તો દેવતારાધનપ્રિયઃ ।
ગુરુભક્તિર્મનઃસિદ્ધિઃ પુણ્યકર્માદિસંગ્રહઃ ॥ ૩૬॥

રાશેશાદ્રિપુરન્ધ્રસ્થે નીચે વા પાપસંયુતે ।
દારપુત્રાદિપીડા ચ દેહપીડા મહદ્ભયમ્ ॥ ૩૭॥

રાજકોપં પ્રકુરુતેઽભીષ્ટવસ્તુવિનાશ્નમ્ ।
પાપમૂલદ્દ્રવ્યનાશં દેહભ્રષ્ટં મનોરુજમ્ ॥ ૩૮॥

સ્વર્ણદાનં પ્રકુર્વીત સ્વેષ્ટજાપ્યં ચ કારયેત્ ।
ગવાં કપિલવર્ણાનાં દાનેનારોગ્યમાદિશેત્ ॥ ૩૯॥

સૂર્યસ્યાન્તર્ગતે મન્દે લગ્નાત્કેન્દ્રત્રિકોણગે ।
શત્રુનાશો મહત્સૌખ્યં સ્વલ્પધાન્યાર્થલાભકૃત્ ॥ ૪૦॥

વિવાહાદિસુકાર્યઞ્ચ ગૃહે તસ્ય શુભાવહમ્ ।
સ્વોચ્ચે સ્વક્ષેત્રગે મન્દે સુહૃદ્ગ્રહસમન્વિતે ॥ ૪૧॥

ગૃહે કલ્યાણસમ્પત્તિર્વિવાહાદિષુ સત્ક્રિયા ।
રાજસન્માનકીર્તિશ્ચ નાનાવસ્ત્રધનાગમમ્ ॥ ૪૨॥

દાયેશાદથ રન્ધ્રસ્થે વ્યયે વા પાપસંયુતે ।
વાતશૂલમહાવ્યાધિજ્વરાતીસારપીડનમ્ ॥ ૪૩॥

બન્ધનં કાર્યહાનિશ્ચ વિત્તનાશો મહદ્ભયમ્ ।
અકસ્માત્કલહશ્ચૈવ દાયાદજનવિગ્રહઃ ॥ ૪૪॥

ભુક્ત્યાદૌ મિત્રહાનિઃસ્યાન્મધ્યે કિઞ્ચિત્સુખાવહમ્ ।
અન્તે ક્લેશકરં ચૈવ નીચે તેષાં તથૈવ ચ ॥ ૪૫॥

પિતૃમાતૃવિયોગશ્ચ ગમનાગમમં તથા ।
દ્વિતીયદ્યૂનનાથે તુ અપમૃત્યુભયં ભવેત્ ॥ ૪૬॥

કૃષ્ણાં ગાં મહિષીં દદ્યાન્મૃત્યુઞ્જયજપં ચરેત્ ।
છાગદાનં પ્રકુર્વીત સર્વસમ્પત્પ્રદાયકમ્ ॥ ૪૭॥

સૂર્યાસ્યાન્તર્ગતે સૌમ્યે સ્વોચ્ચે વા સ્વર્ક્ષગેઽપિ વા ।

કેન્દ્રત્રિકોણલાભસ્થે બુધે વર્ગબલૈર્યુતે ॥ ૪૮॥

રાજ્યલાભો મહોત્સાહો દારપુત્રાદિસૌખ્યકૃત્ ।
મહારજપ્રસાદેન વાહનામ્બરભૂષણમ્ ॥ ૪૯॥

પુણ્યતીર્થફલાવાપ્તિર્ગૃહે ગોધનસંકુલમ્ ।
ભાગ્યલાભાધિપૈર્યુક્તે લાભવૃદ્ધિકોરો ભવેત્ ॥ ૫૦॥

ભાગ્યપંચમકર્મસ્થે સન્માનો ભવતિ ધ્રુવમ્ ।
સુકર્મધર્મબુદ્ધિશ્ચ ગુરુદેવદ્વિજાર્જનમ્ ॥ ૫૧॥

ધનધાન્યાદિસંયુક્તો વિવાહઃ પુત્રસમ્ભવઃ ।
દાયેશાચ્છુભરાશિસ્થે સૌમ્યયુક્તે મહત્સુખમ્ ॥ ૫૨॥

વૈવાહિકં યજ્ઞકર્મ દાનધર્મજપાદિકમ્ ।
સ્વનામાઙ્કિતપદ્યાનિ નામદ્વયમથાઽપિ વા ॥ ૫૩॥

ભોજનામ્બરભૂષાપ્તિરમરેશો ભવેન્નરઃ ।
દાયેશાદ્રિપુરન્ધ્રસ્થે રિષ્ફગે નીચગેઽપિ વા ॥ ૫૪॥

દેહપીડા મનસ્તાપો દારપુત્રાદિપીડનમ્ ।
ભુક્ત્યાદૌ દુઃખમાપ્નોતિ મધ્યે કિઞ્ચિત્સુખાવહમ્ ॥ ૫૫॥

અન્તે તુ રાજભીતિશ્ચ ગમનાગમનં તથા ।
દ્વિતીયે દ્યૂનનાથે તુ દેહજાડ્યં જ્વરાદિકમ્ ॥ ૫૬॥

વિષ્ણુનામસહસ્રં ચ હ્યન્નદાનં ચ કારયેત્ ।
રજતપ્રતિમાદાનં કુર્યાદારોગ્યસિદ્ધયે ॥ ૫૭॥

સૂર્યસ્યાન્તર્ગતે કેતૌ દેહપીડા મનોવ્યથા ।
અર્થવ્યયં રાજકોપં સ્વજનાદેરુપદ્રવમ્ ॥ ૫૮॥

લગ્નાધિપેન સંયુક્તે આદૌ સૌખ્યં ધનાગમમ્ ।
મધ્યે તત્ક્લેશમાપ્નોતિ મૃતવાર્તાગમં વદેત્ ॥ ૫૯॥

અથાષ્ટમવ્યયે ચૈવં દાયેશાત્પાપસંયુતે ।
કપોલદન્તરોગશ્ચ મૂત્રકૃચ્છ્રસ્ય સમ્ભવઃ ॥ ૬૦॥

સ્થાનવિચ્યુતિરર્થસ્ય મિત્રહાનિઃ પિતુર્મૃતિઃ ।
વિદેશગમનં ચૈવ શત્રુપીડા મહદ્ભયમ્ ॥ ૬૧॥

લગ્નાદુપચયે કેતૌ યોગકારકસંયુતે ।
શુભાંશે શુભવર્ગે ચ શુભકર્મફલોદયઃ ॥ ૬૨॥

પુત્રદારાદિસૌખ્યં ચ સન્તોષં પ્રિયવર્દ્ધનમ્ ।
વિચિત્રવસ્ત્રલાભશ્ચ યશોવૃદ્ધિઃ સુખાવહા ॥ ૬૩॥

દ્વિતીયાદ્યૂનનાથે વા હ્યપમૃત્યુભયં વદેત્ ।
દુર્ગાજપં ચ કુર્વીત છાગદાનં સુખાપ્તયે ॥ ૬૪॥

સૂર્યસ્યાન્તર્ગતે શુક્રે ત્રિકોણે કેન્દ્રગેઽપિ વા ।
સ્વોચ્ચે મિત્રસ્વવર્ગસ્થેઽભીષ્ટસ્ત્રીભોગ્યસમ્પદઃ ॥ ૬૫॥

ગ્રામાન્તરપ્રયાણં ચ બ્રાહ્મણપ્રભુદર્શનમ્ ।
રાજ્યલાભો મહોત્સાહશ્છત્રચામરવૈભવમ્ ॥ ૬૬॥

ગૃહે કલ્યાણસમ્પત્તિર્નિત્યં મિષ્ટાન્નભોજનમ્ ।
વિદ્રુમાદિરત્નલાભો મુક્તાવસ્ત્રાદિ લાભકૃત્ ॥ ૬૭॥

ચતુષ્પાજ્જીવલાભઃ સ્યાદ્બહુધાન્યધનાદિકમ્ ।
ઉત્સાહઃ કીર્તિસમ્પત્તિર્નરવાહનસમ્પદઃ ॥ ૬૮॥

ષષ્ઠાષ્ટમવ્યયે શુક્રે દાયેશાદ્બલવર્જિતે ।
રાજકોપો મનઃક્લેશઃ પુત્રસ્ત્રીધનનાશનમ્ ॥ ૬૯॥

ભુક્ત્યાદૌ મધ્યમં મધ્યે લાભઃ શુભકરો ભવેત્ ।
અન્તે યશોનાશનં ચ સ્થાનભ્રંશમથાપિ વા ॥ ૭૦॥

બન્ધુદ્વેષં વદેદ્ વાપિ સ્વકુલાદ્ભોગનાશનમ્ ।
ભાર્ગવે દ્યૂનનાથે તુ દેહે જાડ્યં રુજોભયમ્ ॥ ૭૧॥

રન્ધ્રરિષ્ફસમાયુક્તે હ્યપમૃત્યુર્ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં મૃત્યુર્જયજપં ચરેત્ ॥ ૭૨॥

શ્વેતાં ગાં મહિષીં દદ્યાદ્રુદ્રજાપ્યં ચ કારયેત્ ।
તતઃ શાન્તિમવાપ્નોતિ શઙ્કરસ્ય પ્રસાદતઃ ॥ ૭૩॥

---

અથ ચન્દ્રાન્તર્દશાફલાધ્યાયઃ ॥ ૫૩॥

સ્વોચ્ચે સ્વક્ષેત્રગે ચન્દ્રે ત્રિકોણે લાભગેઽપિ વા ।
ભાગ્યકર્માધિપૈર્યુક્તે ગજાશ્વામ્બરસંકુલમ્ ॥ ૧॥

દેવતાગુરુભક્તિશ્ચ પુણ્યશ્લોકાદિકીર્તનમ્ ।
રાજ્યલાભો મહત્સૌખ્યં યશોવૃદ્ધિઃ સુખાવહા ॥ ૨॥

પૂર્ણે ચન્દ્રે બલં પૂર્ણં સેનાપત્યં મહત્સુખમ્ ।
પાપયુક્તેઽથવા ચન્દ્રે નીચે વા રિષ્ફષષ્ઠગે ॥ ૩॥

અતકાલે ધનનાશઃ સ્યાત્સ્થાનચ્યુતિરથાપિ વા ।
દેહલસ્યં મનસ્તપો રાજમન્ત્રિવિરોધકૃત્ ॥ ૪॥

માતૃક્લેશો મનોદુઃખં નિગડં બન્ધુનાશનમ્ ।
દ્વિતીયદ્યૂનનાથે તુ રન્ધ્રરિષ્ફેશસંયુતે ॥ ૫॥

દેહજાડ્યં મહાભઙ્ગમપમૃત્યોભયં વદેત્ ।
શ્વેતાં ગાં મહિષીં દદ્યાત્ સ્વદશાન્તર્ગતે વિધૌ ॥ ૬॥

ચન્દ્રસ્યાન્તર્ગતે ભૌમે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સૌભાગ્યં રાજસન્માનં વસ્ત્રભરણભૂષણમ્ ॥ ૭॥

યત્નાત્ કાર્યાર્થસિદ્ધિસ્તુ ભવિષ્યતિ ન સંશયઃ ।
ગૃહક્ષેત્રાભિવૃદ્ધિશ્ચ વ્યવહારે જયો ભવેત્ ॥ ૮॥

કાર્યલાભો મહત્સૌખ્યં સ્વોચ્ચે સ્વક્ષેત્રગે ફલમ્ ।
તથાઽષ્ટમવ્યયે ભૌમે પાપયુક્તેઽથ વા યદિ ॥ ૯॥

દાયશાદશુભસ્થાને દેહાર્તિઃ પરવીક્ષિતે ।
ગૃહક્ષેત્રાદિહાનિશ્ચ વ્યવહારે તથા ક્ષતિઃ ॥ ૧૦॥

મૃત્યુવર્ગેષુ કલહો ભૂપાલસ્ય વિરોધનમ્ ।
આત્મબન્ધુવિયોગશ્ચ નિત્યં નિષ્ઠુરભાષણમ્ ॥ ૧૧॥

દ્વિતીયે દ્યૂનનાથે તુ રન્ધ્રે રન્ધ્રાધિપો યદા ।
તત્તોષપરિહારાર્થં બ્રાહ્મણસ્યાઽર્ચનં ચરેત્ ॥ ૧૨॥

ચન્દ્રસ્યાન્તર્ગતે રાહૌ લગ્નાત્કેન્દ્રત્રિકોણગે ।
આદૌ સ્વલ્પફલં જ્ઞેયં શત્રુપીડા મહદ્ભયમ્ ॥ ૧૩॥

ચૌરાહિરાજભીતિશ્ચ ચતુષ્પાજ્જિવપીડનમ્ ।
બન્ધુનાશો મિત્રહાનિર્માનહાનિર્મનોવ્યથા ॥ ૧૪॥

શુભયુક્તે શુભૈર્દૃષ્ટે લગ્નાદુપચયેઽપિ વા ।

યોગકારકસમ્બન્ધે સર્વકાર્યાર્થસિદ્ધિકૃત્ ॥ ૧૫॥

નૈરૃત્યે પશ્ચિમે ભાવે ક્વચિત્પ્રભુસમાગમઃ ।
વાહનામબરલાભશ્ચ સ્વેષ્ટકાર્યાર્થસિદ્ધિકૃત્ ॥ ૧૬॥

દાયેશાદથ રન્ધ્રથે વ્યયે વા બલવર્જિતે ।
સ્થાનભ્રંશો મનોદુખં પુત્રક્લેશો મહદ્ભયમ્ ॥ ૧૭॥

દારપીડા ક્વચિજ્જ્ઞેયા ક્વચિત્સ્વાઙ્ગે રુજોભયમ્ ।
વૃશ્ચિકાદિવિષાદ્ભીતિશ્ચૌરાહિનૃપપીડનમ્ ॥ ૧૮॥

દાયેશાત્કેન્દ્રકોણે વ દુશ્ચિક્યે લાભગેઽપિ વા ।
પુણ્યતીર્થફલાવાપ્તિર્દેવતાદર્શનં મહત્ ॥ ૧૯॥

પરોપકારકર્માદિપુણ્યકર્માદિસમ્પ્રહઃ ।
દ્વિતીયદ્યૂનરાશિઅથે દેહબાધા ભવિષ્યતિ ॥ ૨૦॥

તદ્દોષપરિહારાર્થં રુદ્રજાપ્યં સમાચરેત્ ।
છાગદાનં પ્રકુર્વીત દેહારોગ્યં પ્રજાયતે ॥ ૨૧॥

ચન્દ્રસ્યાન્તર્ગતે જીવે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સ્વગેહે લાભગે સ્વોચ્ચે રાજ્યલાભો મહોત્સવઃ ॥ ૨૨॥

વસ્ત્રાઽલઙ્કારભૂષાપ્તી રાજપ્રીતિર્ધનાગમઃ ।
ઇષ્ટદેવપ્રસાદેન ગર્ભાધાનાદિકં ફલમ્ ॥ ૨૩॥

તથા શોભનકાર્યાણિ ગૃહે લક્ષ્મીઃ કટાક્ષકૃત્ ।
રાજાશ્રયં ધનં ભૂમિગજવાજિસમન્વિતમ્ ॥ ૨૪॥

મહારાજપ્રસાદેન સ્વેષ્ટસિદ્ધિઃ સુખાવહા ।
ષ।ષ્ઠાષ્ટમવ્યયે જીવે નીચ વાસ્તઙ્ગતે યદિ ॥ ૨૫॥

પાપયુક્તેઽશુભં કર્મ ગુરુપુત્રાદિનાશનમ્ ।
સ્થાનભ્રંશો મનોદુઃખમકસ્માત્કલહો ધ્રુવમ્ ॥ ૨૬॥

ગૃહક્ષેત્રાદિનાશશ્ચ વાહનામ્બરનાશનમ્ ।
દાયેશાત્કેન્દ્રકોણે વા દુશ્ચિક્યે લાભગેઽપિ વા ॥ ૨૭॥

ભોજનામ્બરપરવાદિ=લાભં સૌખ્યં કરોતિ ચ ।
બ્રહાત્રાદિસુખસમ્પત્તિં ધૈર્યં વીર્યપરાક્રમમ્ ॥ ૨૮॥

યજ્ઞવ્રતવિવાહાદિરાજ્યશ્રીધનસમ્પદઃ ।
દાયેશાદ્રિપુરન્ધ્રસ્થે વ્યયે વા બલવર્જિતે ॥ ૨૯॥

કરોતિ કુત્સિનાન્નં ચ વિદેશગમનં તથા ।
ભુક્ત્યાદૌ શોભનં પ્રોક્તમન્તે ક્લેશકરં ભવેત્ ॥ ૩૦॥

દ્વિતીયદ્યૂનનાથે ચ હ્યપમૃત્યુર્ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં શિવસાહસ્રકં જપેત્ ।
સ્વર્ણદાનમિતિ પ્રોક્તં સર્વકષ્ટનિવારકમ્ ॥ ૩૧॥

ચન્દ્રસ્યાન્તર્ગતે મન્દે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સ્વક્ષેત્રે સ્વાંશગે ચૈવ મન્દે તુઙ્ગાંશસંયુતે ॥ ૩૨॥

શુભદૃષ્ટયુતે વાઽપિ લાભે વા બલસંયુતે ।
પુત્રમિત્રાર્થસમ્પત્તિઃ શૂદ્રપ્રભુસમાગમાત્ ॥ ૩૩॥

વ્યયસાયાત્ફલાધિક્યં ગૃહે ક્ષેત્રાદિવૃદ્ધિદમ્ ।
પુત્રલાભશ્ચ કલ્યાણં રાજાનુગ્રહવૈભવમ્ ॥ ૩૪॥

ષષ્ઠાષ્ટમવ્યયે મન્દે નીચે વા ધનગેઽપિ વા ।
તદ્ભુક્ત્યાદૌ પુણ્યતીર્થે સ્નાનં ચૈવ તુ દર્શનમ્ ॥ ૩૫॥

અનેકજનત્રાસશ્ચ શસ્ત્રપીડા ભવિષ્યતિ ।
દાયેશાત્કેન્દ્રરાશિસ્થે ત્રિકોણે બલગેઽપિ વા ॥ ૩૬॥

ક્વચિત્સૌખ્યં ધનાપ્તિશ્ચ દારપુત્રવિરોધકૃત્ ।
દ્વિતીયદ્યૂનરન્ધ્રસ્થે દેહબાધા ભવિષ્યતિ ॥ ૩૭॥

તદ્દોષપરિહારાર્થં મૃત્યુઞ્જયજપં ચરેત્ ।
કૃષ્ણાં ગાં મહિષીં દદ્યાદ્દાનેમારોગ્યમાદિશેત્ ॥ ૩૮॥

ચન્દ્રસ્યાન્તર્ગતે સૌમ્યે કેન્દ્રલાભત્રિકોણગે ।
સ્વર્ક્ષે નિજાંશકે સૌમ્યે તુઙ્ગે વા બલસંયુતે ॥ ૩૯॥

ધનાગમો રાજમાનપ્રિયવસ્ત્રાદિલાભકૃત્ ।
વિદ્યાવિનોદસદ્ગોષ્ઠી જ્ઞાનવૃદ્ધિઃ સુખાવહા ॥ ૪૦॥

સન્તાનપ્રાપ્તિઃ સન્તોષો વાણિજ્યાદ્ધનલાભકૃત્ ।
વાહનચ્છત્રસંયુક્તનાનાલઙ્કારલાભકૃત્ ॥ ૪૧॥

દાયેશાત્કેન્દ્રકોણે વા લાભે વા ધનગેઽપિ વા ।

વિવાહો યજ્ઞદીક્ષા ચ દાનધર્મશુભાદિકમ્ ॥ ૪૨॥

રાજપ્રીતિકરશ્ચૈવ વિદ્વજ્જનસમાગમઃ ।
મુક્તામણિપ્રવાલાનિ વાહનામ્બરભૂષણમ્ ॥ ૪૩॥

આરોગ્યપ્રીતિસૌખ્યં ચ સોમપાનાદિકં સુખમ્ ।
દાયેશાદ્રિપુરન્ધ્રસ્થે વ્યયે વા નીચગેઽપિ વા ॥ ૪૪॥

તદ્ભુક્તૌ દેહબાધા ચ કૃષિગોભૂમિનાશનમ્ ।
કારાગૃહપ્રવેશાશ્ચ દારપુત્રાદિપીડનમ્ ॥ ૪૫॥

દ્વિતીયદ્યૂનનાથે તુ જ્વરપીડા મહદ્ભયમ્ ।
છાગદાનં પ્રકુર્વીત વિષ્ણુસાહસ્રકં જપેત્ ॥ ૪૬॥

ચન્દ્રસ્યાન્તર્ગતે કેતૌ કેન્દ્રલાભત્રિકોણગે ।
દુશ્ચિક્યે બલસંયુક્તે ધનલાભં મહત્સુખમ્ ॥ ૪૭॥

પુત્રદારાદિસૌખ્યં ચ વિધિકર્મ કરોતિ ચ ।
ભુક્ત્યાદૌ ધનહાનિઃ સ્યાન્મધ્યગે સુખમાપ્નુયાત્ ॥ ૪૮॥

દાયેશાત્કેન્દ્રલાભે વા ત્રિકોણે બલસંયુતે ।
ક્વચિત્ફલં દશાદૌ તુ દદ્યાત્ સૌખ્યં ધનાગમમ્ ॥ ૪૯॥

ગોમહિષ્યાદિલાભં ચ ભુક્ત્યન્તે ચાર્થનાશનમ્ ।
પાપયુક્તેઽથવા દૃષ્ટે દાયેશાદ્રન્ધ્રરિઃફગે ॥ ૫૦॥

શત્રુતઃ કાર્યહાનિઃ સ્યાદકસ્માત્કલહો ધ્રુવમ્ ।
દ્વિતીયદ્યૂનરાશિસ્ત્વ્હે હ્યનારોગ્યં મહદ્ભયમ્ ॥ ૫૧॥

મૃત્યુઞ્જયજપં કુર્યાત્ સર્વસમ્પત્પ્રદાયકમ્ ।
તતઃ શાન્તિમવાપ્નોતિ શઙ્કરસ્ય પ્રસાદતઃ ॥ ૫૨॥

ચન્દ્રસ્યાન્તર્ગતે શુક્રે કેન્દ્રલાભત્રિકોણગે ।
સ્વોચ્ચે સ્વક્ષેત્રગે વાપિ રાજ્યલાભં કરોતિ ચ ॥ ૫૩॥

મહારાજપ્રસાદેન વાહનામ્બરભૂષણમ્ ।
ચતુષ્પાજ્જિવલાભઃ સ્યાદ્દારપુત્રાદિવર્ધનમ્ ॥ ૫૪॥

નૂતનાગારનિર્માણં નિત્યં મિષ્ટાન્નભોજનમ્ ।
સુગન્ધપુષ્પમાલ્યાદિરમ્યસ્ત્ર્યારોગ્યસમ્પદમ્ ॥ ૫૫॥

દશાધિપેન સંયુક્તે દેહસૌખ્યં મહત્સુખમ્ ।
સત્કીર્તિસુખસમ્પત્તિગૃહક્ષેત્રાદિવૃદ્ધિકૃત્ ॥ ૫૬॥

નીચે વાઽસ્તઙ્ગતે શુક્રે પાપગ્રહયુતેક્ષિતે ।
ભૂનાશઃ પુત્રમિત્રાદિનાશનં પત્નિનાશનમ્ ॥ ૫૭॥

ચતુષ્પાજ્જિવહાનિઃ સ્યાદ્રાજદ્વારે વિરોધકૃત્ ।
ધનસ્થાનગતે શુક્રે સ્વચ્ચે સ્વક્ષેત્રસંયુતે ॥ ૫૮॥

નિધિલાભં મહત્સૌખ્યં ભૂ લાભં પુત્રસમ્ભવમ્ ।
ભાગ્યલાભાદિપૈર્યુક્તે ભાગ્યવૃદ્ધિઃ કરોત્યસૌ ॥ ૫૯॥

મહારાજપ્રસાદેન સ્વેષ્ટસિદ્ધિઃ સુખાવહા ।
દેવબ્રાહ્મણભક્તિશ્ચ મુક્તવિદ્રુમલાભકૃત્ ॥ ૬૦॥

દાયશાલ્લાભગે શુક્રે ત્રિકોણે કેન્દ્રગેઽપિ વા ।
ગૃહક્ષેત્રાભિવૃદ્ધિશ્ચ વિત્તલાભો મહત્સુખમ્ ॥ ૬૧॥

દાયેશાદ્રિપુરન્ધ્રસ્થે વ્યયે વા પાપસંયુતે ।
વિદેશવાસદુઃખાર્તિમૃત્યુચૌરાદિપીડનમ્ ॥ ૬૨॥

દ્વિતીયદ્યૂનનાથે તુ અપમૃત્યુભયં ભવેત્ ।
તદ્દોષવિનિવૃત્ત્યર્થં રુદ્રજાપ્યં ચ કારયેત્ ॥ ૬૩॥

શ્વેતાં ગાં રજતં દદ્યાચ્છન્તિમાપ્નોત્યસંશયઃ ।
શઙ્કરસ્ય પ્રસાદેન નાઽત્ર કાર્યા વિચારણા ॥ ૬૪॥

ચન્દ્રસ્યાન્તર્ગતે ભાનૌ સ્વોચ્ચે સ્વક્ષેત્રસંયુતે ।
કેન્દ્રે ત્રિકોણે લાભે વા ધને વા સોદરાલયે ॥ ૬૫॥

નષ્ટરાજ્યધનપ્રાપ્તિર્ગૃહે કલ્યાણશોભનમ્ ।
મિત્રરાજપ્રસાદેન ગ્રામભૂમ્યાદિલાભ્કૃત્ ॥ ૬૬॥

ગર્ભાધાનફલપ્રાપ્તિર્ગૃહે લક્ષ્મીઃ કટાક્ષકૃત્ ।
ભુક્ત્યન્તે દેહ આલસ્યં જ્વરપીડા ભવિષ્યતિ ॥ ૬૭॥

દાયેશાદપિ રન્ધ્રસ્થે વ્યયે વા પાપસંયુતે ।
નૃપચૌરાહિભીતિશ્ચ જ્વરરોગાદિસમ્ભવઃ ॥ ૬૮॥

વિદેશગમને ચાર્તિ લભતે ન સંશયઃ ।
દ્વિતીયદ્યૂનનાથે તુ જ્વરપીડા ભવિષ્યતિ ॥ ૬૯॥

તદ્દોષપરિહારાર્થં શિવપૂજાં ચ કારયેત્ ।
તતઃ શાન્તિમવાપ્નોતિ શાઙ્કરસ્ય પ્રસાદતઃ ॥ ૭૦॥

---

અથ કુજદશાન્તર્દશાફલાધ્યાયઃ ॥ ૫૪॥

કુજે સ્વાન્તર્ગતે વિપ્ર લગ્નાત્કેન્દ્રત્રિકોણગે ।
લાભે વા શુભસંયુક્તે દુશ્ચિક્યે ધનસંયુતે ॥ ૧॥

લગ્નાધિપેન સંયુક્તે રાજાઽનુગ્રહવૈભવમ્ ।
લક્ષ્મીકટોક્ષચિહ્નાનિ નષ્ટરાજ્યાર્થલાભકૃત્ ॥ ૨॥

પુત્રોત્સવાદિસન્તોષો ગૃહે ગોક્ષીરસઙ્કુલમ્ ।
સ્વોચ્ચે વા સ્વર્ક્ષગે ભૌમે સ્વાંશે વા બલસંયુતે ॥ ૩॥

ગૃહક્ષેત્રાભિવૃદ્ધિશ્ચ ગોમહિષ્યાદિલાભકૃત્ ।
મહારાજપ્રસાદેન સ્વેષ્ટસિદ્ધિઃ સુખાવહા ॥ ૪॥

અથાઽષ્ટમવ્યયે ભૌમે પાપદૃગ્યોગસંયુતે ।
મૂત્રકૃચ્છ્રાદિરોગશ્ચ કષ્ટાધિક્યં વ્રણાદ્ભયમ્ ॥ ૫॥

ચૌરાહિરાજપીડા ચ ધનધાન્યપશુક્ષયઃ ।
દ્વિતીયે દ્યૂનનાથે તુ દેહજાડ્યં મનોવ્યથા ॥ ૬॥

તદ્દોષપરિહારાર્થં રુદ્રજાપ્યં ચ કારયેત્ ।
અનડ્વાહં પ્રદદ્યાચ્ચ કુજદોષનિવૃત્તયે ॥ ૭॥

તેન તુષ્ટો ભવેદ્ ભૌમઃ શઙ્કરસ્ય પ્રસાદતઃ ।
આરોગ્યં કુરુતે તસ્ય સર્વસમ્પત્તિદાયકમ્ ॥ ૮॥

કુજસ્યાન્તર્ગતે રાહૌ સ્વોચ્ચે મૂલત્રિકોણગે ।
શુભૈર્યુક્તે શુભૈર્દૃષ્ટે કેન્દ્રલાભતૃકોણગે ॥ ૯॥

તત્કાલે રાજસમ્માનં ગૃહભૂમ્યાદિલાભકૃત્ ।
કલત્રપુત્રલાભઃ સ્યાદ્વ્યવસાયાત્ફલાધિકમ્ ॥ ૧૦॥

ગઙ્ગાસ્નાનફલાવાપ્તિં વિદેશગમનં તથા ।
તથાઽષ્ટમવ્યયે રાહૌ પાપયુક્તેઽથ વીક્ષિતે ॥ ૧૧॥

ચૌરાહિવ્રણભીતિશ્ચ ચતુષ્પાજ્જીવનશનમ્ ।

વાતપિત્તરુજોભીતિઃ કારાગૃહનિવેશનમ્ ॥ ૧૨॥

ધનસ્થાનગતે રાહૌ ધનનાસં મહદ્ભયમ્ ।
સપ્તમસ્થાનગે વાઽપિ હ્યપમૃત્યુભયં મહત્ ॥ ૧૩॥

નાગપૂજાં પ્રકુર્વીત દેવબ્રાહ્મણભોજનમ્ ।
મૃત્યુઞ્જયજપં કુર્યાદાયુરારોગ્યલબ્ધયે ॥ ૧૪॥

કુજસ્યાન્તર્ગતે જીવે ત્રિકોણે કેન્દ્રગેઽપિ વા ।
લાભે વા ધનસંયુક્તે તુઙ્ગાંશે સ્વાંશગેપિ વા ॥ ૧૫॥

સત્કીર્તી રાજસમ્માનં ધનધાન્યસ્ય વૃદ્ધિકૃત્ ।
ગૃહે કલ્યાણસમ્પત્તિર્દારપુત્રાદિલાભકૃત્ ॥ ૧૬॥

દાયેશાત્કેન્દ્રરાશિસ્થે ત્રિકોણે લાભગેઽપિ વા ।
ભાગ્યકર્માધિપૈર્યુક્તે વાહનાધિપસંયુતે ॥ ૧૭॥

લગ્નાધિપસમાયુક્તે શુભાંશે શુભવર્ગગે ।
ગૃહક્ષેત્રાભિવૃદ્ધિશ્ચ ગૃહે કલ્યાણસમ્પદઃ ॥ ૧૮॥

દેહારોગ્યં મહત્કીર્તિગૃહે ગોકુલસંગ્રહઃ ।
ચતુષ્પાજ્જીવલાભઃ સ્યાદ્વ્યવસાયાત્ફલાધિકમ્ ॥ ૧૯॥

કલપુત્રસૌખ્યં ચ રાજસમ્માનવૈભવમ્ ।
ષષ્ઠાષ્ટમવ્યયે જીવે નીચે વાસ્તંગતે સતિ ॥ ૨૦॥

પાપગ્રહેણ સંયુક્તે દૃષ્ટે વા દુર્બલે સતિ ।
ચૌરાહિનૃપભીતિશ્ચ પિત્તરોગાદિસમ્ભવમ્ ॥ ૨૧॥

પ્રેતબાધા ભૃત્યનાશઃ સોદરાણાં વિનાશનમ્ ।
દ્વિતીયદ્યૂનનાથે તુ હ્યપમૃત્યુજ્વરાદિકમ્ ।
તદ્દોષપરિહારાર્થં શિવસાહસ્રકં જપેત્ ॥ ૨૨॥

કુજસ્યાન્તર્ગતે મન્દે સ્વર્ક્ષે કેન્દ્રત્રિકોણગે ।
મૂલત્રિકોણકેન્દ્રે વા તુઙ્ગાંશે સ્વાંશગે સતિ ॥ ૨૩॥

લગ્નાધિપતિના વાપિ શુભદૃષ્ટિયુતેઽસિતે ।
રાજ્યસૌખ્યં યશોવૃદ્ધિઃ સ્વગ્રામે ધાન્યવૃદ્ધિકૃત્ ॥ ૨૪॥

પુત્રપૌત્રસમાયુક્તો ગૃહે ગોધનસંગ્રહઃ ।
સ્વવારે રાજસમ્માનં સ્વમાસે પુત્રવૃદ્ધિકૃત્ ॥ ૨૫॥

નીચાદિક્ષેત્રગે મન્દે તથાઽષ્ટવ્યયરાશિગે ।
મ્લેચ્છવર્ગપ્રભુભયં ધનધન્યાદિનાશનમ્ ॥ ૨૬॥

નિગડે બન્ધનં વ્યાધિરન્તે ક્ષેત્રનાશકૃત્ ।
દ્વિતીયદ્યૂનનાથે તુ પાપયુક્તે મહદ્ભયમ્ ॥ ૨૭॥

ધનનાશશ્ચ સઞ્ચારે રાજદ્વેષો મનોવ્યથા ।
ચૌરાગ્નિનૃપપીડા ચ સહોદરવિનાશનમ્ ॥ ૨૮॥

બન્ધુદ્વેષઃ પ્રમાદ્યૈશ્ચ જીવહાનિશ્ચ જાયતે ।
અકસ્માચ્ચ મૃતેર્ભીતિઃ પુત્રદારાદિપીડનમ્ ॥ ૨૯॥

કારાગૃહાદિભીદિશ્ચ રાજદણ્ડો મહદ્ભયમ્ ।
દાયેશાત્કેન્દ્રરાશિસ્થે લાભસ્થે વા ત્રિકોણગે ॥ ૩૦॥

વિદેશયાનં લભતે દુષ્કીર્તિર્વિવિધા તથા ।
પાપકર્મરતો નિત્યં બહુજીવાદિહિંસકઃ ॥ ૩૧॥

વિક્રયઃ ક્ષેત્રહાનિશ્ચ સ્થાનભ્રંશો મનોવ્યથા ।
રણે પરાજયશ્ચૈવ મૂત્રકૃચ્છ્રાન્મહદ્ભયમ્ ॥ ૩૨॥

દાયેશાદથ રન્ધ્રે વા વ્યયે વા પાપસંયુતે ।
તદ્ભુક્તૌ મરણં જ્ઞેયં નૃપચૌરાદિપીડનમ્ ॥ ૩૩॥

વાતપીડા ચ શૂલાદિજ્ઞાતિશ્ત્રુભયં ભવેત્ ॥ ૩૪॥

તદ્દોષપરિહારાર્થં મૃત્યુઞ્જયજપં ચરેત્ ।
તતઃ સુખમવાપ્નોતિ શઙ્કરસ્ય પ્રસાદતઃ ॥ ૩૫॥

કુજસ્યાન્તર્ગતે સૌમ્યે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સત્કથાશ્વાઽજપાદાનં ધર્મબુદ્ધિર્મહદ્યશઃ ॥ ૩૬॥

નીતિમાર્ગપ્રસઙ્ગશ્ચ નિત્યં મિષ્ટાન્નભોજનમ્ ।
વાહનામ્બરપશ્વાદિર્રાજકર્મ સુખાનિ ચ ॥ ૩૭॥

કૃષિકર્મફલે સિદ્ધિર્વારણામ્બરભૂષણમ્ ।
નીચે વાસ્તઙ્ગતે વાપિ ષષ્ઠાષ્ટવ્યયગેઽપિ વા ॥ ૩૮॥

હૃદ્રોગં માનહાનિશ્ચ નિગડં બન્ધુનાશનમ્ ।
દારપુત્રાર્થનાશઃ સ્યાચ્ચતુષ્પાજ્જીવનાશનમ્ ॥ ૩૯॥

દશાધિપેન સંયુક્તે શત્રુવૃદ્ધિર્મહદ્ભયમ્ ।
વિદેશગમનં ચૈવ નાનારોગાસ્તથૈવ ચ ॥ ૪૦॥

રાજદ્વારે વિરોધશ્ચ કલહઃ સ્વજનૈરપિ ।
દાયેશાત્કેન્દ્રત્રિકોણે વા સ્વોચ્ચે યુક્તાર્થલાભકૃત્ ॥ ૪૧॥

અનેકધનનાથત્વં રાજસમ્મનમેવ ચ ।
ભૂપાલયોગં કુરુતે ધનમ્બરવિભૂષણમ્ ॥ ૪૨॥

ભૂરવાદ્યમૃદંગાદિ સેનાપત્યં મહત્સુખમ્ ।
વિદ્યાવિનોદવિમલા વસ્ત્રવાહનભૂષણમ્ ॥ ૪૩॥

દારપુત્રાદિવિભવં ગૃહે લક્ષ્મીઃ કટાક્ષકૃત્ ।
દાયેશાત્ષષ્ઠરિઃફસ્થે રન્ધ્રે વા પાપસંયુતે ॥ ૪૪॥

તદ્દાયે માનોહાનિઃ સ્યાત્ક્રૂરબુદ્ધિસ્તુ ક્રૂરવાક્ ।
ચૌરાગ્નિનૃપપીડા ચ માર્ગે દસ્યુભયાદિકમ્ ॥ ૪૫॥

અકસ્માત્કલહશ્ચૈવ બુધમુક્તૌ ન સંશયઃ ।
દ્વિતીયદ્યૂનનાથે તુ મહાવ્યાધિર્ભયઙ્કરઃ ॥ ૪૬॥

અશ્વદાનં પ્રકુર્વીત વિષ્ણોર્નામસહસ્રકમ્ ।
સર્વસમ્પત્પ્રદં વિપ્ર સર્વારિષ્ટપ્રશાન્તયે ॥ ૪૭॥

કુજસ્યાન્તર્ગતે કેતૌ ત્રિકોણે કેન્દ્રગેઽપિ વા ।
દિશ્ચિક્યે લાભગે વાઽપિ શુભયુક્તે શુભેક્ષિતે ॥ ૪૮॥

રાજાનુગ્રહશાન્તિશ્ચ બહુસૌખ્યં ધનાગમઃ ।
કિઞ્ચિત્ફલં દશાદૌ તુ ભૂલાભઃ પુત્રલાભકૃત્ ॥ ૪૯॥

રાજસંલાભકાર્યાણિ ચતુષ્પાજ્જીવલાભકૃત્ ।
યોગકારકસંસ્થાને બલવીર્યસમન્વિતે ॥ ૫૦॥

પુત્રલાભો યશોવૃદ્ધિર્ગૃહે લક્ષ્મીઃ કટાક્ષકૃત્ ।
ભૃત્યવર્ગધનપ્રાપ્તિઃ સેનાપત્યં મહત્સુખમ્ ॥ ૫૧॥

ભૂપાલમિત્રં કુરુતે યાગામ્બરાદિભૂષણમ્ ।
દાયેશાત્ષષ્ઠરિઃફસ્થે રન્ધ્રે વા પાપસંયુતે ॥ ૫૨॥

કલહો દન્તરોગશ્ચ ચૌરવ્યાઘ્રાદિપીડનમ્ ।

જ્વરાતિસારકુષ્ઠાદિદારપુત્રાદિપીડનમ્ ॥ ૫૩॥

દ્વિતીયસપ્તમસ્થાને દેહે વ્યાધિર્ભવિષ્યતિ ।
અપમાનમનસ્તાપો ધનધાન્યાદિપ્રચ્યુતિમ્ ॥ ૫૪॥

કુજસ્યાન્તર્ગતે શુક્રે કેન્દ્રલાભત્રિકોણગે ।
સ્વોચ્ચે વા સ્વર્ક્ષગે વાઽપિશુભસ્થાનાધિપેઽથવા ॥ ૫૫॥

રાજ્યલાભો મહત્સૌખ્યં ગજાશ્વામ્બરભૂષણમ્ ।
લગ્નાધિપેન સમ્બન્ધે પુત્રદારાદિવર્ધનમ્ ॥ ૫૬॥

આયુષો વૃદ્ધિરૈશ્વર્યં ભાગ્યવૃદ્ધિસુખં ભવેત્ ।
દાયેશાત્કેન્દ્રકોણસ્થે લાભે વા ધનગેઽપિ વા ॥ ૫૭॥

તત્કાલે શ્રિયમાપ્નોતિ પુત્રલાભં મહત્સુખમ્ ।
સ્વપ્રભોશ્ચ મહત્સૌખ્યં ધનવસ્ત્રાદિલાભકૃત્ ॥ ૫૮॥

મહારજપ્રસાદેન ગ્રામભૂમ્યાદિલાભદમ્ ।
ભુક્ત્યન્તે ફલમાપ્નોતિ ગીતનૃત્યાદિલાભકૃત્ ॥ ૫૯॥

પુણ્યતીર્થસ્નાનલાભં કર્માધિપસમન્વિતે ।
પુણ્યધર્મદયાકૂપતડાગં કારયિષ્યતિ ॥ ૬૦॥

દાયેશાદ્રન્ધ્રરિષ્ફસ્થે ષષ્ઠે વા પાપસંયુતે ।
કરોતિ દુઃખબાહુલ્યં દેહપીડાં ધનક્ષયમ્ ॥ ૬૧॥

રાજચૌરાદિભીતિઞ્ચ ગૃહે કલહમેવ ચ ।
દારપુત્રાદિપીડાં ચ ગોમહિષ્યાદિનાશકૃત્ ॥ ૬૨॥

દ્વિતીયદ્યૂનનાથે તુ દેહબાધા ભવિષ્યતિ ।
શ્વેતાં ગાં મહિષીં દદ્યાદાયુરારોગ્યવૃદ્ધયે ॥ ૬૩॥

કુજસ્યાન્તર્ગતે સૂર્યે સ્વોચ્ચે સ્વક્ષેત્રકેન્દ્રગે ।
મૂલત્રિકોણલાભે વા ભાગ્યકર્મેશસંયુતે ॥ ૬૪॥

તદ્ભુક્તૌ વાહનં કીર્તિં પુત્રલાભં ચ વિન્દતિ ।
ધનધાન્યસમૃદ્ધિઃ સ્યાદ્ ગૃહે કલ્યાણસમ્પદઃ ॥ ૬૫॥

ક્ષેમારોગ્યં મહદ્ધૈર્યં રાજપૂજ્યં મહત્સુખમ્ ।
વ્યવસાયાત્ફલાધિક્યં વિદેશે રાજદર્શનમ્ ॥ ૬૬॥

દાયેશાત્ષષ્ઠરિષ્ફે વા વ્યયે વા પાપસંયુતે ।
દેહપીડા મનસ્તાપઃ કાર્યહાનિર્મહદ્ભયમ્ ॥ ૬૭॥

શિરોરોગો જ્વરાદિશ્ચ અતિસારમથાપિ વા ।
દ્વિતીયદ્યૂનનાથે તુ સર્પજ્વરવિષાદ્ભયમ્ ॥ ૬૮॥

સુતપીડાભયં ચૈવ શાન્તિ કુર્યાદ્યથાવિધિ ।
દેહારોગ્યં પ્રકુરુતે ધનધાન્યચયં તથા ॥ ૬૯॥

કુજસ્યાન્તર્ગતે ચન્દ્રે સ્વોચ્ચે સ્વક્ષેત્રકેન્દ્રગે ।
ભાર્યવાહનકર્મેશલગ્નાધિપસમન્વિતે ॥ ૭૦॥

કરોતિ વિપુલં રાજ્યં ગન્ધમાલ્યામ્બરાદિકમ્ ।
તડાગં ગોપુરાદીનાં પુણ્યધર્માદિસંગ્રહમ્ ॥ ૭૧॥

વિવાહોત્સવકર્માણિ દારપુત્રાદિસૌખ્યકૃત્ ।
પિતૃમાતૃસુખાવાપ્તિં ગૃહે લક્ષ્મીઃ કટાક્ષકૃત્ ॥ ૭૨॥

મહારજપ્રસાદેન સ્વેષ્ટસિદ્ધિસુખાદિકમ્ ।
પૂર્ણે ચન્દ્રે પૂર્ણફલં ક્ષીણે સ્વલ્પફલં ભવેત્ ॥ ૭૩॥

નીચારિસ્થઽષ્ટમે ષષ્ઠે દાયેશાદ્રિપુરન્ધ્રકે ।
મરણં દારપુત્રાણાં કષ્ટં ભૂમિવિનાશનમ્ ॥ ૭૪॥

પશુધાન્યક્ષયશ્ચૈવ ચૌરાદિરણભીતિકૃત્ ।
દ્વિતીયદ્યૂનનાથે તુ હ્યપમૃત્યુર્ભવિષ્યતિ ॥ ૭૫॥

દેહજાડ્યં મનોદુઃખં દુર્ગા લક્ષ્મીજપં ચરેત્ ।
શ્વેતાં ગાં મહિષીં દદ્યાદનેમારોગ્યમાદિશેત્ ॥ ૭૬॥

---

અથ રાહ્વન્તર્દશાફલાધ્યાયઃ ॥ ૫૫॥

કુલીરે વૃશ્ચિકે રાહૌ કન્યત્યાં ચાપગેઽપિ વા ।
તદ્ભુક્તો રાજસમ્માનં વસ્ત્રવાહનભૂષણમ્ ॥ ૧॥

વ્યવસાયાત્ફલાધિક્યં ચતુષ્પાજ્જીવલાભકૃત્ ।
પ્રયાણં પશ્ચિમે ભાગે વાહનામ્બરલાભકૃત્ ॥ ૨॥

લગ્નાદુપચયે રાહૌ શુભગ્રહયુતેક્ષિતે ।
મિત્રાંશે તુઙ્ગભાગાંશે યોગકારકસંયુતે ॥ ૩॥

રાજ્યલાભં મહોત્સાહં રાજપ્રીતિં શુભાવહમ્ ।
કરોતિ સુખસમ્પત્તિં દારપુત્રાદિવર્દ્ધનમ્ ॥ ૪॥

લગ્નાષ્ટમે વ્યયે રાહૌ પાપયુક્તેઽથ વીક્ષિતે ।
ચૌરાદિવ્રણપીડા ચ સર્વત્રૈવં ભવેદ્દ્વિજ ॥ ૫॥

રાજદ્વારજનદ્વેષ ઇષ્ટબન્ધુવિનાશનમ્ ।
દારપુત્રાદિપીડા ચ ભવત્યેવ ન સંશયઃ ॥ ૬॥

દ્વિતીયદ્યૂનનાથે વા સપ્તમસ્થાનમાશ્રિતે ।
સદા રોગો મહાકષ્ટં શાન્તિં કુર્યાદ્યથાવિધિ ।
આરોગ્યં સમ્પદશ્ચૈવ ભવિષ્યન્તિ તદા દ્વિજ ॥ ૭॥

રાહુરન્તર્ગતે જીવે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સ્વોચ્ચે સ્વક્ષેત્રગે વાપિ તુઙ્ગસ્વર્ક્ષાંશગેઽપિ વા ॥ ૮॥

સ્થાનલાભં મનોધૈર્યં શત્રુનાશં મહત્સુખમ્ ।
રાજપ્રીતિકરં સૌખ્યં જનોઽતીવ સમશ્નુતે ॥ ૯॥

દિનેદિને વૃદ્ધિરપિ સિતપક્ષે શશી યથા ।
વાહનાદિધનં ભૂરિ ગૃહે ગોધનસંકુલમ્ ॥ ૧૦॥

નૈરૃત્યે પશ્ચિમે ભાગે પ્રયાણં રાજદર્શનમ્ ।
યુક્તકાર્યાર્થસિદ્ધિઃ સ્યાત્સ્વદેશે પુનરેષ્યતિ ॥ ૧૧॥

ઉપકારો બ્રાહ્મણાનાં તીર્થયાત્રાદિકર્મણામ્ ।
વાહનગ્રામલાભશ્ચ દેવબ્રાહ્મણપૂજનમ્ ॥ ૧૨॥

પુત્રોત્સવાદિસન્તોષો નિત્યં મિષ્ટાન્નભોજનમ્ ।
નીચે વાઽસ્તઙ્ગતે વાપિ ષષ્ઠાષ્ટવ્યયરાશિગે ॥ ૧૩॥

શત્રુક્ષેત્રે પાપયુક્તે ધનહાનિર્ભવિષ્યતિ ।
કર્મવિઘ્નો ભવેત્તસ્ય માનહાનિશ્ચ જાયતે ॥ ૧૪॥

કલત્રપુત્રપીડા ચ હૃદ્રોગો રાજકારકૃત્ ।
દાયેશાત્કેન્દ્રકોણે વા લાભે વા ધનગેઽપિ વા ॥ ૧૫॥

દુશ્ચિક્યે બલસમ્પૂર્ણે ગૃહક્ષેત્રાદિવૃદ્ધિકૃત્ ।
ભોજનામ્બરપશ્વાદિદાનધર્મજપાદિકમ્ ॥ ૧૬॥

ભુક્ત્યન્તે રાજકોપાચ્ચ દ્વિમાસં દેહપીડનમ્ ।
જ્યેષ્ઠભ્રાતુર્વિનાશશ્ચ માતૃપિત્રાદિપીડનમ્ ॥ ૧૭॥

દાયેશાત્ષષ્ઠરન્ધ્રે વા રિઃફે વા પાપસંયુતે ।
તદ્ભુક્તૌ ધનહાનિઃ સ્યાદ્દેહપીડા ભવિષ્યતિ ॥ ૧૮॥

દ્વિતીયદ્યૂનનાથે વા હ્યપમૃત્યુર્ભવિષ્યતિ ।
સ્વર્ણસ્ય પ્રતિમાદાનં શિવપૂજં ચ કાર્યતે ॥ ૧૯॥

સ્ર્/ઈશમ્ભોશ્ચ પ્રસાદેન ગ્રહસ્તુષ્ટો દ્વિજોત્તમ ।
દેહારોગ્યં પ્રકુરુતે શાન્તિં કુર્યાદ્વિચક્ષણમ્ ॥ ૨૦॥

રાહોરન્તર્ગતે મન્દે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સ્વોચ્ચે મૂલત્રિકોણે વા દુશ્ચિક્યે લાભરાશિગે ॥ ૨૧॥

તદ્ભુક્તૌ નૃપતેઃ સેવા રાજપ્રીતિકરી શુભા ।
વિવાહોત્સવકાર્યાણિ કૃત્વા પુણ્યાનિ ભૂરિશઃ ॥ ૨૨॥

આરામકરણે યુક્તો તડાગં કારયિષ્યતિ ।
શૂદ્રપ્રભુવશાદિષ્ટલાભો ગોધનસંગ્રહઃ ॥ ૨૩॥

પ્રયાણં પશ્ચિમે ભાગે પ્રભુમૂલાદ્ધનક્ષયઃ ।
દેહાલસ્યં ફલાલ્પત્વં સ્વદેશે પુનરેષ્યતિ ॥ ૨૪॥

નીચારિક્ષેત્રગે મન્દે રન્ધ્રે વા વ્યયગેઽપિ વા ।
નીચારિરાજભીતિશ્ચ દારપુત્રાદિપીડનમ્ ॥ ૨૫॥

આત્મબન્ધુમનસ્તાપં દાયાદજનવિગ્રહમ્ ।
વ્યવહારે ચ કલહમકસ્માદ્ભૂષણં લભેત્ ॥ ૨૬॥

દાયેશાત્ષષ્ઠરિષ્ફે વા રન્ધ્રે વા પાપસંયુતે ।
હૃદ્રોગો માનહાનિશ્ચ વિવાદઃ શત્રુપીડનમ્ ॥ ૨૭॥

અન્યદેશાદિસઞ્ચારો ગુલ્મવદ્ધ્યાધિભાગ્ભવેત્ ।
કુભોજનં કોદ્રવાદિ જાતિદુઃખાદ્ભયં ભવેત્ ॥ ૨૮॥

દ્વિતીયદ્યૂનનાથે તુ હ્યપમૃત્યુર્ભવિષ્યતિ ।
કૃષ્ણાં ગાં મહિષીં દદ્યાદ્દાનેમારોગ્યમાદિશેત્ ॥ ૨૯॥

રાહોરન્તર્ગતે સૌમ્યે ભાગ્યે વા સ્વર્ક્ષગેઽપિ વા ।
તુઙ્ગે વા કેન્દ્રરાશિસ્થે પુત્રે વા બલગેઽપિ વા ॥ ૩૦॥

રાજયોગં પ્રકુરુતે ગૃહે કલ્યાણવર્દ્ધનમ્ ।
વ્યાપારેણ ધનપ્રાપ્તિવિદ્યાવાહનમુત્તમમ્ ॥ ૩૧॥

વિવાહોત્સવકાર્યાણિ ચતુષ્પાજ્જીવલાભકૃત્ ।
સૌમ્યમાસે મહત્સૌખ્યં સ્વવારે રાજદર્શનમ્ ॥ ૩૨॥

સુગન્ધપુષ્પશય્યાદિ સ્ત્રીસૌખ્યં ચાતિરોભનમ્ ।
મહારાજપ્રસાદેન ધનલાભો મહદ્યશઃ ॥ ૩૩॥

દાયેશાત્કેન્દ્રલાભે વા દુશ્ચિક્યે ભાગ્યકર્મગે ।
દેહારોગ્યં હૃદુત્સાહ ઇષ્ટસિદ્ધિઃ સુખાવહા ॥ ૩૪॥

પુણ્યશ્લોકાદિકીર્તિશ્ચ પુરાણશ્રવણાદિકમ્ ।
વિવાહો યજ્ઞદીક્ષા ચ દાનધર્મદયાદિકમ્ ॥ ૩૫॥

ષષ્ઠાષ્ટમવ્યયે સૌમ્યે મન્દેનાપિ યુતેક્ષિતે ।
દાયેશાત્ષષ્ઠરિઃફે વા રન્ધ્રે વા પાપસંયુતે ॥ ૩૬॥

દેવભાહ્મણનિન્દા ચ ભોગભાગ્યવિવર્જિતઃ ।
સત્યહીનશ્ચ દુર્બુદ્ધિશ્ચૌરાહિનૃપપીડનમ્ ॥ ૩૭॥

અકસ્માત્કલહશ્ચૈવ ગુરુપુત્રાદિનાશનમ્ ।
અર્થવ્યયો રાજકોપો દારપુત્રાદિપીડનમ્ ॥ ૩૮॥

દ્વિતીયદ્યૂનનાથે વા હ્યપમૃત્યુભયં વદેત્ ।
તદ્દોષપરિહારાર્થં વિષ્ણુસાહસ્રકં જપેત્ ॥ ૩૯॥

રાહોરન્તર્ગતે કેતૌ ભ્રમણં રાજતો ભયમ્ ।
વાતજ્વરાદિરોગશ્ચ ચતુષ્પાજ્જીવહાનિકૃત્ ॥ ૪૦॥

અષ્ટમાધિસંયુક્તે દેહજાડ્યં મનોવ્યથા ।
શુભયુક્તે શુભૈર્દૃષ્ટે દેહસૌખ્યં ધનાગમઃ ।
રાજસમ્માનભૂષાપ્તિર્ગૃહે શુભકરો ભવેત્ ॥ ૪૧॥

લગ્નાધિપેન સમ્બન્ધે ઇષ્ટસિદ્ધિઃ સુખાવહા ।
લગ્નાધિપસમાયુક્તે લાભો વા ભવતિ ધ્રુવમ્ ॥ ૪૨॥

ચતુષ્પાજ્જિવલાભઃ સ્યાત્કેન્દ્રે વાથ ત્રિકોણગે ।
રન્ધ્રસ્થાનગતે કેતૌ વ્યયે વા બલવર્જિતે ॥ ૪૩॥

તદ્ભુક્તૌ બહુરોગઃ સ્યાચ્ચોરાહિવ્રણપીડનમ્ ।
પિતૃમાતૃવિયોગશ્ચ ભ્રાતૃદ્વેષો મનોરુજા ॥ ૪૪॥

દ્વિતીયદ્યૂનનાથે તુ દેહબાધા ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં છાગદાનં ચ કારયેત્ ॥ ૪૫॥

રાહોરન્તર્ગતે શુક્રે લગ્નાત્કેન્દ્રત્રિકોણગે ।
લાભે વા બલસંયુક્તે યોગપ્રાબલ્યમાદિશેત્ ॥ ૪૬॥

વિપ્રમૂલાદ્ધનપ્રાપ્તિર્ગોમહિષ્યાદિલાભકૃત્ ।
પુત્રોત્સવાદિસન્તોષો ગૃહે કલ્યાણસમ્ભવઃ ॥ ૪૭॥

સમ્માનં રાજસમ્મનં રાજ્યલાભો મહત્સુખમ્ ।
સ્વોચ્ચે વા સ્વર્ક્ષગે વાપિ તુઙ્ગાંશે સ્વાંશગેઽપિ વા ॥ ૪૮॥

નૂતનં ગૃહનિર્માણં નિત્યં મિષ્ટાન્નભોજનમ્ ।
કલત્રપુત્રવિભવં મિત્રસંગઃ સુભોજનમ્ ॥ ૪૯॥

અન્નદાનં પ્રિયં નિત્યં દાનધર્માદિસંગ્રહઃ ।
મહારાજપ્રસાદેન વાહનામ્બરભૂષણમ્ ॥ ૫૦॥

વ્યવસાયાત્ફલાધિક્યં વિવાહો મૌઞ્જિબન્ધનમ્ ।
ષષ્ઠાષ્ટમવ્યયે શુક્રે નીચે શત્રુગૃહે સ્થિતે ॥ ૫૧॥

મન્દારફણિસંયુક્તે તદ્ભુક્તૌ રોગમાદિશેત્ ।
અકસ્માત્કલહં ચૈવ પિતૃપુત્રવિયોગકૃત્ ॥ ૫૨॥

સ્વબન્ધુજનહાનિશ્ચ સર્વત્ર જનપીડનમ્ ।
દાયાદકલહશ્ચૈવ સ્વપ્રભોઃ સ્વસ્ય મૃત્યુકૃત્ ॥ ૫૩॥

કલત્રપુત્રપીડા ચ શૂલરોગાદિસમ્ભવઃ ।
દાયેશાત્કેન્દ્રરાશિસ્થે ત્રિકોણે વા સમન્વિતે ॥ ૫૪॥

લાભે વા કર્મરાશિસ્થે ક્ષેત્રપાલમહત્સુખમ્ ।
સુગન્ધવસ્ત્રશય્યાદિ ગાનવાદ્યસુખં ભવેત્ ॥ ૫૫॥

છત્રચામરભૂષાપ્તિઃ પ્રિયવસ્તુસમન્વિતા ।
દાયેશાદ્રિપુરન્ધ્રસ્થે વ્યયે વા પાપસંયુતે ॥ ૫૬॥

વિપ્રાહિનૃપચૌરાદિમૂત્રકૃચ્છ્રાન્મહદ્ભયમ્ ।
પ્રમેહાદ્રૌધિરો રોગઃ કુત્સિતાન્નં શિરોવ્યથા ॥ ૫૭॥

કારાગૃહપ્રવેશશ્ચ રાજદણ્ડાદ્ધનક્ષયઃ ।
દ્વિતીયદ્યૂનનાથે વા દારપુત્રાદિનાશનમ્ ॥ ૫૮॥

આત્મપીડા ભયં ચૈવ હ્યપમૃત્યુભયં ભવેત્ ।
દુર્ગાલક્ષ્મીજપં કુર્યાત્ તતઃસુખમવાપ્નુયાત્ ॥ ૫૯॥

રાહોરન્તર્ગતે સૂર્યે સ્વોચ્ચે સ્વક્ષેત્રકેન્દ્રગે ।
ત્રિકોણે લાભગે વાઽપિ તુઙ્ગાંશે સ્વાંશગેઽપિ વા ॥ ૬૦॥

શુભગ્રહેણ સન્દૃષ્ટે રાજપ્રીતિકરં શુભમ્ ।
ધનધાન્યસમૃદ્ધિશ્ચ હ્યલ્પમાન સુખવાહમ્ ॥ ૬૧॥

અલ્પગ્રામાધિપત્યં ચ સ્વલ્પલાભો ભવિષ્યતિ ।
ભાગ્યલગ્નેશસંયુક્તે કર્મેશેન નિરીક્ષિતે ॥ ૬૨॥

રાજાશ્રયો મહાકીર્તિર્વિદેશગમનં તથા ।
દેશાધિપત્યયોગશ્ચ ગજશ્વામ્બરભૂષણમ્ ॥ ૬૩॥

મનોઽભિષ્ટપ્રદાનં ચ પુત્રકલ્યાણસમ્ભવમ્ ।
દયેશાદ્રિઃફરન્ધ્રસ્થે ષષ્ઠે વા નીચગેઽપિ વા ॥ ૬૪॥

જ્વરાતિસારરોગશ્ચ કલહો રાજવિગ્રહઃ ।
પ્રયાણં શત્રુવૃદ્ધિશ્ચ ન્રિપચૌરાગ્નિપીડનમ્ ॥ ૬૫॥

દાયેશાત્કેન્દ્રકોણે વા દશ્ચિક્યે લાભગેઽપિ વા ।
વિદેશે રાજસમ્માનં કલ્યાણં ચ શુભાવહમ્ ॥ ૬૬॥

દ્વિતીયદ્યૂનનાથે તુ મહારોગો ભવિષ્યતિ ।
સૂર્યપ્રણામં શાન્તિં ચ કુર્યાદારોગ્યસમ્ભવામ્ ॥ ૬૭॥

રાહોરન્તર્ગતે ચન્દ્રે સ્વક્ષેત્રે સ્વોચ્ચગેઽપિ વા ।
કેન્દ્રત્રિકોણલાભે વા મિત્રર્ક્ષે શુભસંયુતે ॥ ૬૮॥

રાજત્વં રાજપૂજ્યત્વં ધનાર્થં ધનલાભકૃત્ ।
આરોગ્યં ભૂષણ્ં ચૈવ મિત્રસ્ત્રીપુત્રસમ્પદઃ ॥ ૬૯॥

પૂર્ણે ચન્દ્રે ફલં પૂર્ણં રાજપ્રીત્યા શુભાવહમ્ ।
અશ્વવાહનલાભઃ સ્યદ્ગૃહક્ષેત્રાદિવૃદ્ધિકૃત્ ॥ ૭૦॥

દાયેશાત્સુખભાગ્યસ્થે કેન્દ્રે વા લાભગેઽપિ વા ।

લક્ષ્મીકટાક્ષચિહ્નાનિ ગૃહે કલ્યાણસમ્ભવઃ ॥ ૭૧॥

સર્વકાર્યસિદ્ધિઃ સ્યાદ્ધનધાન્યસુખાવહા ।
સત્કીર્તિલાભસમ્માનં દેવ્યારાધનમાચરેત્ ॥ ૭૨॥

દાયેશાત્ષષ્ઠરન્ધ્રસ્થે વ્યયે વા બલવર્જિતે ।
પિશાચક્ષુદ્રવ્યાઘ્રાદ્ય્સિર્ગૃહક્ષેત્રાર્થનાશનમ્ ॥ ૭૩॥

માર્ગે ચૌરભયં ચૈવ વ્રણાધિક્ય મહોદયમ્ ।
દ્વિતીયદ્યૂનનાથે તુ અપમૃત્યુસ્તદા ભવેત્ ॥ ૭૪॥

શ્વેતાં ગાં મહિષીં દદ્યાદ્ વિપ્રાયારોગ્યસિદ્ધયે ।
તતઃ સૌખ્યમવાપ્નોતિ ચન્દ્રગ્રહપ્રસાદતઃ ॥ ૭૫॥

રાહોરન્તર્ગતે ભૌમે લગ્નાલ્લાભત્રિકોણગે ।
કેન્દ્રે વા શુભસંયુક્તે સ્વોચ્ચે સ્વક્ષેત્રગેઽપિ વા ॥ ૭૬॥

નષ્ટરાજ્યધનપ્રાપ્તિર્ગૃહક્ષેત્રાભિવૃદ્ધિકૃત્ ।
ઇષ્ટદેવપ્રસાદેન સન્તાનસુખભાગ્ભવેત્ ॥ ૭૭॥

ક્ષિપ્રભોજ્યાન્મહત્સૌખ્યં ભૂષણશ્ચામ્બરાદિકૃત્ ।
દાયેશાત્કેન્દ્રકોણે વા દુશ્ચિક્યે લાભગેઽપિ વા ॥ ૭૮॥

રક્તવસ્ત્રાદિલાભઃ સ્યાત્પ્રયાણં રાજદર્શનમ્ ।
પુત્રવર્ગેષુ કલ્યાણં સ્વપ્રભોશ્ચ મહત્સુખમ્ ॥ ૭૯॥

સેનપત્યં મહોત્સાહો ભ્રાતૃવર્ગધનાગમઃ ।
દાયેશાદ્રન્ધ્રરિઃફે વા ષષ્ઠે પાપસમન્વિતે ॥ ૮૦॥

પુત્રદારાદિહાનિશ્ચ સૂદરાણાં ચ પીડનમ્ ।
સ્થાનભ્રંશો બન્ધુવર્ગદારપુત્રવિરોધનમ્ ॥ ૮૧॥

ચૌરાહિવ્રણભીતિશ્ચ સ્વદેહસ્ય ચ પીડનમ્ ।
આદૌ ક્લેશકરં ચૈવ મધ્યાન્તે સૌખમાપ્નુયાત્ ॥ ૮૨॥

દ્વિતીયદ્યૂનનાથે તુ દેહાલસ્યં મહદ્ભયમ્ ।
અનડ્વાહં ચ ગાં દદ્યાદારોગ્યસુખલબ્ધયે ॥ ૮૩॥

---

અથ જીવાન્તર્દશાફલાધ્યાયઃ ॥ ૫૬॥

સ્વોચ્ચે સ્વક્ષેત્રગે જીવે લગ્નાત્કેન્દ્રત્રિકોણગે ।
અનેકરાજધીશો વા સમ્પન્નો રાજપૂજિતઃ ॥ ૧॥

મોમહિષ્યાદિલાભશ્ચ વસ્ત્રવાહનભૂષણમ્ ।
નૂતનસ્થાનનિર્માણં હર્મ્યપ્રાકારસંયુતમ્ ॥ ૨॥

ગજાન્તૈશ્વર્યસમ્પત્તિર્ભાગ્યકર્મફલઓદયઃ ।
બ્રાહ્મણપ્રભુસમ્માનં સમાનં પ્રભુદર્શનમ્ ॥ ૩॥

સ્વપ્રભોઃ સ્વફલાધિક્ય દારપુત્રાદિલાભકૃત્ ।
નીચાંશે નીચરાશિસ્થે ષષ્ઠાષ્ટમવ્યયરાશિગે ॥ ૪॥

નીચસઙ્ગો મહાદુઃખં દાયાદજનવિગ્રહઃ ।
કલહો ન વિચારોસ્ય સ્વપ્રભુષ્વપમૃત્યુકૃત્ ॥ ૫॥

પુત્રદારવિયોગશ્ચ ધનધાન્યાર્થહાનિકૃત્ ।
સપ્તમાધિપદોષેણ દેવવાધા ભવિષ્યતિ ॥ ૬॥

તદ્દોષપરિહારાર્થં શિવસાહસ્રકં જપેત્ ।
રુદ્રજાપ્યં ચ ગોદાનં કુર્યાત્ સ્વાઽભીષ્ટલબ્ધયે ॥ ૭॥

જીવસ્યાન્તર્ગતે મન્દે સ્વોચ્ચે સ્વક્ષેત્રમિત્રભે ।
લગ્નાત્કેન્દ્રત્રિકોણસ્થે લાભે વા બલસંયુતે ॥ ૮॥

રાજ્યલાભો મહત્સૌખ્યં વસ્ત્રાભરણસંયુતમ્ ।
ધનધાન્યાદિલાભશ્ચ સ્ત્રીલાભો બહુસૌખ્યકૃત્ ॥ ૯॥

વાહનામ્બરપશ્વાદિભૂલાભઃ સ્થાનલાભકૃત્ ।
પુત્રમિત્રાદિસૌખ્યં ચ નરવાહનયોગકૃત્ ॥ ૧૦॥

નીલવસ્ત્રાદિલાભશ્ચ નીલાશ્વં લભતે ચ સઃ ।
પશ્ચિમાં દિશમાશ્રિત્ય પ્રયાણં રાજદર્શનમ્ ॥ ૧૧॥

અનેકયાનલાભં ચ નિર્દિશેન્મન્દભુક્તિષુ ।
લગ્નાત્ષષ્ઠાષ્ટમે મન્દે વ્યયે નીચેઽસ્તગેઽપ્યરૌ ॥ ૧૨॥

ધનધાન્યાદિનાશશ્ચ જ્વરપીડા મનોરુજઃ ।
સ્ત્રીપુત્રાદિષુ પીડા વાવ્રણાત્યાદિકમુદ્ભવેત્ ॥ ૧૩॥

ગૃહે ત્વશુભકાર્યાણિ ભૃત્યવર્ગાદિપીડનમ્ ।
ગોમહિષ્યાદિહાનિશ્ચ બન્ધુદ્વેષી ભવિષ્યતિ ॥ ૧૪॥

દાયેશાત્કેન્દ્રકોણસ્થે લાભે વા ધનગેઽપિ વા ।
ભૂરાભશ્ચાર્થલાભશ્ચ પુત્રલાભસુખં ભવેત્ ॥ ૧૫॥

ગોમહિષ્યાદિલાભશ્ચ શૂદ્રમૂલાદ્ધનં તથા ।
દાયેશાદ્રિપુરન્ધ્રસ્થે વ્યયે વા પાપસંયુતે ॥ ૧૬॥

ધનધાન્યાદિનાશશ્ચ બન્ધુમિત્રવિરોધકૃત્ ।
ઉદ્યોગભઙ્ગો દેહાર્તિઃ સ્વજનાનાં મહદ્ભયમ્ ॥ ૧૭॥

દ્વિસપ્તમાધિપે મન્દે હ્યપમૃત્યુર્ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં વિષ્ણુસાહસ્રકં જપેત્ ॥ ૧૮॥

કૃષ્ણાં ગાં મહિષીં દદ્યાદનેનારોગ્યમાદિશેત્ ।
મન્દગ્રહપ્રસાદેન સત્યં સત્યં દ્વિજોત્તમ ॥ ૧૯॥

જીવસ્યાન્તર્ગતે સૌમ્યે કેન્દ્રલાભત્રિકોણગે ।
સ્વોચ્ચે વા સ્વર્ક્ષગે વાપિ દશાધિપસમન્વિતે ॥ ૨૦॥

અર્થલાભો દેહસૌખ્યં રાજ્યલાભો મહત્સુખમ્ ।
મહારાજપ્રસાદેન સ્વેષ્ટસિદ્ધિઃ સુખાવહા ॥ ૨૧॥

વાહનામ્બરપશ્વાદિગોધનૈસ્સંકુલં ગૃહમ્ ।
મહીસુતેન સંદૃષ્ટે શત્રુવૃદ્ધિઃ સુખક્ષયઃ ॥ ૨૨॥

વ્યવસાયાત્ફલં નિષ્ટં જ્વરાતીમારપીડનમ્ ।
દાયેશાદ્ભાગ્યકોણે વા કેન્દ્રે વા તુઙ્ગરાશિગે ॥ ૨૩॥

સ્વદેશે ધનલાભશ્ચ પિતૃમાતૃસુખાવહા ।
ગજવાજિસમાયુક્તો રાજમિત્રપ્રસાદતઃ ॥ ૨૪॥

દાયેશાત્ષષ્ઠરન્ધ્રસ્થે વ્યયે વા પાપસંયુતે ।
શુભદૃષ્ટિવિહીને ચ ધન્ધાન્યપરિચ્યુતિઃ ॥ ૨૫॥

વિદેશગમનં ચૈવ માર્ગે ચૌરભયં તથા ।
વ્રણદાહાક્ષિરોગશ્ચ નાનાદેશપરિભ્રમઃ ॥ ૨૬॥

લગ્નાત્ષષ્ઠાષ્ટમભાવે વા વ્યયે વા પાપસંયુતે ।
અકસ્માત્કલહશ્ચૈવ ગૃહે મિષ્ઠુરભાવણમ્ ॥ ૨૭॥

ચતુષ્પાજ્જીવહાનિશ્ચ વ્યવહારે તથૈવ ચ ।

અપમૃત્યુભયં ચૈવ શત્રૂણાં કલહો ભવેત્ ॥ ૨૮॥

શુભદૃષ્ટે શુભૈર્યુક્તે દારસૌખ્યં ધનાગમઃ ।
આદૌ શુભં દેહસૌખ્યં વાહનામ્બરલાભકૃત્ ॥ ૨૯॥

અન્તે તુ ધનહાનિશ્ચેત્સ્વાત્મસૌખ્યં ન જાયતે ।
દ્વિતીયદ્યૂનનાથે વા હ્યપમૃત્યુર્ભવિષ્યતિ ॥ ૩૦॥

તદ્દોષપરિહારાર્થં વિષ્ણુસાહસ્રકં જપેત્ ।
આયુર્વૃદ્ધિકરં ચૈવ સર્વસૌભાગ્યદાયકમ્ ॥ ૩૧॥

જીવસ્યાન્તર્ગતે કેતૌ શુભગ્રહસમન્વિતે ।
અલ્પસૌખ્યધનવ્યાપ્તિઃ કુત્સિતાન્નસ્ય ભોજનમ્ ॥ ૩૨॥

પરાન્નં ચૈવ શ્રાદ્ધાન્નં પાપમૂલાદ્ધનાનિ ચ ।
દાયેશાદ્રિપુરન્ધ્રસ્થે વ્યયે વા પાપસંયુતે ॥ ૩૩॥

રાજકોપો ધનચ્છેદો બન્ધનં રોગપીડનમ્ ।
બલાહાનિઃ પિતૃદ્વેષો ભ્રાતૃદ્વેષો મનોરુજમ્ ॥ ૩૪॥

દાયેશાત્સુતભાગ્યસ્થે વાહને કર્મગેઽપિ વા ।
નરવાહનયોગશ્ચ ગજાશ્વામ્બરસઙ્કુલમ્ ॥ ૩૫॥

મહારાજપ્રસાદેન સ્વેષ્ટકાર્યાર્થલાભકૃત્ ।
વ્યવસાયાત્ફલાધિક્યં ગોમહિષ્યાદિલાભકૃત્ ॥ ૩૬॥

યવનપ્રભુમૂલાદ્વા ધનવસ્ત્રાદિલાભકૃત્ ।
દ્વિતીયદ્યૂનનાથે તુ દેહવાધા ભવિષ્યતિ ॥ ૩૭॥

છાગદાનં પ્રકુર્વીત મૃત્યુઞ્જયજપં ચરેત્ ।
સર્વદોષોપશમનીં શાન્તિં કુર્યાદ્વિધાનતઃ ॥ ૩૮॥

જીવસ્યાન્તર્ગતે શુક્રે ભાગ્યકેન્દ્રેશસંયુતે ।
લાભે વા સુતરાશિસ્થે સ્વક્ષેત્રે શુભસંયુતે ॥ ૩૯॥

નરવાહનયોગશ્ચ ગજાશ્વામ્બરસંયુતઃ ।
મહારજપ્રસાદેન લાભાધિક્યં મહત્સુખમ્ ।
નીલામ્બરાણાં રક્તાનાં લાભશ્ચૈવ ભવિષ્યતિ ॥ ૪૦॥

પૂર્વસ્યાં દિશિ વિપ્રેન્દ્ર પ્રયાણં ધન્લાભદમ્ ।
કલ્યાણં ચ મહાપ્રીતિઃ પિતૃમાતૃસુખાવહા ॥ ૪૧॥

દેવતાગુરુભક્તિશ્ચ અન્નદાનં મહત્તથા ।
તડાગગોપુરાદીનિ દિશેત્ પુણ્યાનિ ભૂરિશઃ ॥ ૪૨॥

ષષ્ઠાષ્ટમવ્યયે નીચે દાયેશાદ્વા તથૈવ ચ ।
કલ્હો બન્ધુવૈષમ્યં દારપુત્રાદિપીડનમ્ ॥ ૪૩॥

મન્દારરાહુસંયુક્તે કલહો રાજતો ભયમ્ ।
સ્ત્રીમૂલાત્કલહશ્ચૈવ શ્વસુરાત્કલહસ્તથા ॥ ૪૪॥

સોદરેણ વિવાદઃ સ્યાદ્ધનધાન્યપરિચ્યુતિઃ ।
દાયેશાત્કેન્દ્રરાશિસ્થે ધને વા ભાગ્યગેઽપિ વા ॥ ૪૫॥

ધનધાન્યાદિલાભશ્ચ સ્ર્/ઈલાભો રાજદર્શનમ્ ॥ ૪૬॥

વાહનં પુત્રલાભશ્ચ પશુવૃદ્ધિર્મહત્સુખમ્ ।
ગીતાવાદ્યપ્રસઙ્ગાદિર્વિદ્વજ્જનસમાગમઃ ॥ ૪૭॥

દિવ્યાન્નભોજનં સૌખ્યં સ્વબન્ધુજનપોષકમ્ ।
દ્વિસપ્તમાધિપે શુક્રે તદ્દશાનાં ધનક્ષતિઃ ॥ ૪૮॥

અપમૃત્યુભયં તસ્ય સ્ત્રીમૂલાદૌષધાદિતઃ ।
તસ્ય રોગસ્ય શાન્ત્યર્થં શાન્તિકર્મ સમાચરેત્ ॥ ૪૯॥

શ્વેતાં ગાં મહિષીં દદ્યાદાયુરારોગ્યવૃદ્ધયે ।
શુક્રગ્રહપ્રસાદેન તતઃ સુખમવાપ્નુયાત્ ॥ ૫૦॥

જીવસ્યાન્તર્ગતે સૂર્યે સ્વોચ્ચે સ્વક્ષેત્રગેઽપિ વા ।
કેન્દ્રે વાઽથત્રિકોણે ચ દુશ્ચિક્યે લાભગેઽપિ વા ॥ ૫૧॥

ધને વા બલસંયુતે દાયેશાદ્વા તથૈવ ચ ।
તત્કાલે ધનલાભઃ સ્યાદ્રાજસમ્માનવૈભવમ્ ॥ ૫૨॥

વાહનામ્બરપશ્વાદિભૂષણં પુત્રસમ્ભવઃ ।
મિત્રપ્રભુવશાદિષ્ટં સર્વકાર્યે શુભાવહમ્ ॥ ૫૩॥

લગ્નાદષ્ટમવ્યયે સૂર્યે દાયેશાદ્વા તથૈવ ચ ।
શિરોરોગાદિપીડા ચ જ્વરપીડા તથૈવ ચ ॥ ૫૪॥

સત્કર્મસુ તદા હીનઃ પાપકર્મચયસ્તથા ।
સર્વત્ર જનવિદ્વેષો હ્યાત્મબન્ધુવિયોગકૃત્ ॥ ૫૫॥

અકસ્માત્કલહશ્ચૈવ જીવસ્યાન્તર્ગતે રવૌ ।
દ્વિતીયદ્યૂનનાથે તુ દેહપીડા ભવિષ્યતિ ॥ ૫૬॥

તદ્દોષપરિહારાર્થમાદિત્યહૃદયં જપેત્ ।
સર્વપીડોપશમનં શ્રીસૂર્યસ્ય પ્રસાદતઃ ॥ ૫૭॥

જીવસ્યાન્તર્ગતે ચન્દ્રે કેન્દ્રે લાભત્રિકોણગે ।
સ્વોચ્ચે વા સ્વર્ક્ષરાશિસ્થે પૂર્ણે ચૈવ બલૈર્યુતે ॥ ૫૮॥

દાયેશાચ્છુભરાશિસ્થે રાજસમ્માનવૈભવમ્ ।
દારપુત્રાદિસૌખ્યં ચ ક્ષીરાણં ભોજનં તથા ॥ ૫૯॥

સત્કર્મ ચ તથા કીર્તિઃ પુત્રપૌત્રાદિવૃદ્ધિદા ।
મહારાજપ્રસાદેન સર્વસૌખ્યં ધનાગમઃ ॥ ૬૦॥

અનેકજનસૌખ્યં ચ દાનધર્માદિસંગ્રહઃ ।
ષષ્ઠાષ્ટમવ્યયે ચન્દ્રે સ્થિતે વા પાપસંયુતે ॥ ૬૧॥

દાયેશાત્ષષ્ઠરન્ધ્રે વા વ્યયે વા બલવર્જિતે ।
માનાર્થબન્ધુહાનિશ્ચ વિદેશપરિવિચ્યુતિઃ ॥ ૬૨॥

નૃપચૌરાદિપીડા ચ દાયાદજનવિગ્રહઃ ।
માતુલાદિવિયોગશ્ચ માતૃપીડા તથૈવ ચ ॥ ૬૩॥

દ્વિતીયષષ્ઠયોરીશે દેહપીડા ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં દુર્ગાપાઠં ચ કારયેત્ ॥ ૬૪॥

જીવસ્યાન્તર્ગતે ભૌમે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સ્વોચ્ચે વા સ્વર્ક્ષગે વાપિ તુઙ્ગાંશે સ્વાંશગેઽપિ વા ॥ ૬૫॥

વિદ્યાવિવાહકાર્યાણિ ગ્રામભૂમ્યાદિલાભકૃત્ ।
જનસામર્થ્યમાપ્નોતિ સર્વકાર્યાર્થસિદ્ધિદમ્ ॥ ૬૬॥

દાયેશાત્કેન્દ્રકોણસ્થે લાભે વા ધનગેઽપિ વા ।
શુભયુક્તે શુભૈર્દૃષ્ટે ધનધાન્યાદિસમ્પદઃ ॥ ૬૭॥

મિષ્ઠાન્નદાનવિભવં રાજપ્રીતિકરં શુભમ્ ।
સ્ત્રીસૌખ્યં ચ સુતવાપ્તિઃ પુણ્યતીર્થફલં તથા ॥ ૬૮॥

દાયેશાદ્રન્ધ્રભાવે વા વ્યયે વા નીચગેઽપિ વા ।

પાપયુતેક્ષિતે વાપિ ધાન્યાર્થગૃહનાશનમ્ ॥ ૬૯॥

નાનરોગભયં દુઃખં નેત્રરોગાદિસમ્ભવઃ ।
પૂર્વાર્દ્ધે કષ્ટમધિકમપરાર્દ્ધે મહત્સુખમ્ ॥ ૭૦॥

દ્વિતીયદ્યૂનનાથે તુ દેહજાડ્યં મનોરુજઃ ।
વૃષભસ્ય પ્રદાનં તુ સર્વસમ્પત્પ્રદાયકમ્ ॥ ૭૧॥

જીવસ્યાન્તર્ગતે રાહૌ સ્વોચ્ચે વા કેન્દ્રગેઽપિ વા ।
મૂલત્રિકોણે ભાગ્યે ચ કેન્દ્રાધિપસમન્વિતે ॥ ૭૨॥

શુભયુતેક્ષિતે વાપિ યોગપ્રીતિં સમાદિશેત્ ।
ભુક્ત્યાદૌ પઞ્ચમાસાંશ્ચ ધનધાન્યાદિકં લભેત્ ॥ ૭૩॥

દેશગ્રામાધિકં ચ યવનપ્રભુદર્શનમ્ ।
ગૃહે કલ્યાણસમ્પત્તિર્બહુસેનાધિપત્યકમ્ ॥ ૭૪॥

દૂરયાત્રાદિગમનં પુણ્યધર્માદિસંગ્રહઃ ।
સેતુસ્નાનફલાવાપ્તિરિષ્ટસિદ્ધિઃ સુખાવહા ॥ ૭૫॥

દાયેષાદ્રન્ધ્રભાવે વા વ્યયે વા પાપસંયુતે ।
ચૌરાહિવ્રણભીતિશ્ચ રાજવૈષમ્યમેવ ચ ॥ ૭૬॥

ગૃહે કર્મકલાપેન વ્યાકુલો ભવતિ ધ્રુવમ્ ।
સોદરેણ વિરોધઃ સ્યાદ્દાયાદજનવિગ્રહઃ ॥ ૭૭॥

ગૃહે ત્વશુભકાર્યાણિ દુઃસ્વપ્નાદિભયં ધ્રુવમ્ ।
અકસ્માત્કલહશ્ચૈવ ક્ષુદ્રશૂન્યાદિરોગકૃત્ ॥ ૭૮॥

દ્વિસપ્તમસ્થિતે રાહૌ દેહવાધાં વિનિર્દિશેત્ ।
તદ્દોષપરિહારાર્થં મૃત્યુઞ્જયજપં ચરેત્ ॥ ૭૯॥

છાગદાનં પ્રકુર્વીત સર્વસૌખ્યમવાપ્નુયાત્ ।
દેવપૂયપ્રસાદેન રાહુતુષ્ટ્યા દ્વિજોત્તમ ॥ ૮૦॥

---

અથ શન્યન્તર્દશાફલાધ્યાયઃ ॥ ૫૭॥

મૂલત્રિકોણે સ્વર્ક્ષે વા તુલાયામુચ્ચગેઽપિ વા ।
કેન્દ્રત્રિકોણલાભે વા રાજયોગાદિસંયુતે ॥ ૧॥

રાજ્યલાભો મહત્સૌખ્યં દારપુત્રાદિવર્ધનમ્ ।
વાહનત્રયસંયુક્તં ગજાશ્વામ્બરસઙ્કુલમ્ ॥ ૨॥

મહારાજપ્રસાદેન સેનાપત્યાદિલાભકૃત્ ।
ચતુષ્પાજ્જીવલાભઃ સ્યાદ્ગ્રામભૂમ્યાદિલાભકૃત્ ॥ ૩॥

તથાઽષ્ટમે વ્યયે મન્દે નીચે વા પાપસંયુતે ।
તદ્ભુક્ત્યાદૌ રાજભીતિર્વિષશસ્ત્રાદિપીડનમ્ ॥ ૪॥

રક્તસ્ત્રાવો ગુલ્મરોગો હ્યતિમારાદિપીડનમ્ ।
મધ્યે ચૌરાદિ ભીતિશ્ચ દેશત્યાગો મનોરુજઃ ॥ ૫॥

અન્તે શુભકરી ચૈવ શનેરન્તર્દશા દ્વિજ ।
દ્વિતીયદ્યૂનનાથે તુ હ્યપમૃત્યુર્ભવિષ્યતિ ॥ ૬॥

તદ્દોષપરિહારાર્થં મ્ટ્યુઞ્જયજપં ચરેત્ ।
તતઃ શાન્તિમવાપ્નોતિ શઙ્કરસ્ય પ્રસાદતઃ ॥ ૭॥

મન્દસ્યાન્તર્ગતે સૌમ્યે ત્રિકોણે કેન્દ્રગેઽપિ વા ।
સમ્માનં ચ યશઃ કીર્તિં વિદ્યાલાભં ધનાગમમ્ ॥ ૮॥

સ્વદેશે સુખમાપ્નોતિ વાહનાદિફલૈર્યુતમ્ ।
યજ્ઞાદિકર્મસિદ્ધિશ્ચ રાજયોગાદિસમ્ભવમ્ ॥ ૯॥

દેહસૌખ્યં હૃદુત્સાહં ગૃહે કલ્યાણસમ્ભવમ્ ।
સેતુસ્નાનફલાવાપ્તિસ્તીર્થયાત્રાદિકર્મણા ॥ ૧૦॥

વાણિજ્યાદ્ધનલાભશ્ચ પુરાણશ્રવણાદિકમ્ ।
અન્નદાનફલં ચૈવ નિત્યં મિષ્ટાન્નભોજનમ્ ॥ ૧૧॥

ષષ્ઠાષ્ટમવ્યયે સૌમ્યે નીચે વાસ્તંગતે સતિ ।
રવ્યારફણિસંયુક્તે દાયેશાદ્વા તથૈવ ચ ॥ ૧૨॥

નૃપાભિષેકમર્થાપ્તિર્દેશગ્રામાધિપત્યતા ।
ફલમીદૃશમાદૌ તુ મધ્યાન્તે રોગપીડનમ્ ॥ ૧૩॥

નષ્ટાનિ સર્વકાર્યાણિ વ્યાકુલત્વં મહદ્ભયમ્ ।
દ્વિતીયસપ્તમાધિશે દેહબાધા ભવિષ્યતિ ॥ ૧૪॥

તદ્દોષપરિહારાર્થં વિષ્ણુસાહસ્રકં જપેત્ ।
અન્નદાનં પ્રકુર્વીત સર્વસમ્પત્પ્રદાયકમ્ ॥ ૧૫॥

મન્દસ્યાન્તર્ગતે કેતૌ શુભદૃષ્ટિયુતેક્ષિતે ।
સ્વોચ્ચે વા શુભરાશિસ્થે યોગકારકસંયુતે ॥ ૧૬॥

કેન્દ્રકોણગતે વાપિ સ્થાનભ્રંશો મહદ્ભયમ્ ।
દરિદ્રબન્ધનં ભીતિઃ પુત્રદારાદિનાશનમ્ ॥ ૧૭॥

સ્વપ્રભોશ્ચ મહાકષ્ટં વિદેશગમનં તથા ।
લગ્નાધિપેન સંયુક્તે આદૌ સૌખ્યં ધનાગમઃ ॥ ૧૮॥

ગઙ્ગાદિસર્વતીર્થેષુ સ્નાનં દૈવતદર્શનમ્ ।
દાયેશાત્કેન્દ્રકોણે વા તૃતીયભવરાશિગે ॥ ૧૯॥

સમર્થો ધર્મબુદ્ધિશ્ચ સૌખ્યં નૃપસમાગમઃ ।
તથાઽષ્ટમે વ્યયે કેતૌ દાયેશાદ્વા તથૈવ ચ ॥ ૨૦॥

અપમૃત્યુભયં ચૈવ કુત્સિતાન્નસ્ય ભોજનમ્ ।
શીતજ્વરાતિસારશ્ચ વ્રણચૌરાદિપીડનમ્ ॥ ૨૧॥

દારપુત્રવિયોગશ્ચ સંસારે ભવતિ ધ્રુવમ્ ।
દ્વિતિયદ્યૂનરાશિસ્થે દેહ પીડા ભવિષ્યતિ ॥ ૨૨॥

છાગદાનં પ્રકુર્વીત હ્યપમૃત્યુનિવારણમ્ ।
કેતુગ્રહપ્રસાદેન સુખશાન્તિમવાપ્નુયાત્ ॥ ૨૩॥

મન્દસ્યાન્તર્ગતે શુક્રે સ્વોચ્ચે સ્વક્ષેત્રગેઽપિ વા ।
કેન્દ્રે વા શુભસંયુક્તે ત્રિઓકોણે લાભગેઽપિ વા ॥ ૨૪॥

દારપુત્રધનપ્રાપ્તિર્દેહારોગ્યં મહોત્સવઃ ।
ગૃહે કલ્યાણસમ્પત્તિ રાજ્યલાભં મહત્સુખમ્ ॥ ૨૫॥

મહારાજપ્રસાદેન હીષ્ટસિદ્ધિઃ સુખાવહા ।
સ્સમ્માનં પ્રભુસમ્માનં પ્રિયવસ્ત્રાદિલાભકૃત્ ॥ ૨૬॥

દ્વિપાન્તરાદ્વસ્ત્રલાભઃ શ્વેતાશ્વો મહિષી તથા ।
ગુરુચારવશાદ્ભાગ્યં સૌખ્યં ચ ધનસમ્પદઃ ॥ ૨૭॥

શનિચારાન્મનુષ્યોઽસૌ યોગમાપ્નોત્યસંશયમ્ ।
શત્રુનીચાસ્તગે શુક્રે ષષ્ઠાષ્ટમવ્યયરાશિગે ॥ ૨૮॥

દારનાશો મનઃક્લેશઃ સ્થાનનાશો મનોરુજઃ ।

દારાનાં સ્વજનક્લેશઃ સન્તાપો જનવિગ્રહઃ ॥ ૨૯॥

દાયેશાદ્ભાગ્યગે ચૈવ કેન્દ્રે વા લાભસંયુતે ।
રાજપ્રીતિકરં ચૈવ મનોઽભીષ્ટપ્રદાયકમ્ ॥ ૩૦॥

દાનધર્મદયાયુક્તં તીર્થયાત્રાદિકં ફલમ્ ।
સાસ્ત્રાર્થકાવ્યરચનાં વેદાન્તશ્રવણાદિકમ્ ॥ ૩૧॥

દારપુત્રાદિસૌખ્યં ચ લભતે નાઽત્ર સંશયઃ ।
દાયેશાદ્વ્યયગે શુક્રે ષષ્ઠે વા હ્યષ્ટમેઽપિ વા ॥ ૩૨॥

નેત્રપીડા જ્વરભયં સ્વકુલાચારવર્જિતઃ ।
કપોલે દન્તશૂલાદિ હૃદિ ગુહ્યે ચ પીડનમ્ ॥ ૩૩॥

જલભીતિર્મનસ્તાપો વૃક્ષાત્પતનસમ્ભવઃ ।
રાજદ્વારે જનદ્વેષઃ સોધરેણ વિરોધનમ્ ॥ ૩૪॥

દ્વિતીયસપ્તમાધીશે આત્મક્લેશો ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં દુર્ગાદેવીજપં ચરેત્ ॥ ૩૫॥

શ્વેતાં ગાં મહિષીં દદ્યાદાયુરારોગ્યવૃદ્ધિદામ્ ।
જગદમ્બાપ્રસાદેન તતઃ સુખમવાપ્નુયાત્ ॥ ૩૬॥

મન્દસ્યાન્તર્ગતે સૂર્યે સ્વોચ્ચે સ્વક્ષેત્રગેઽપિ વા ।
ભાગ્યાધિપેન સંયુક્તે કેન્દ્રલાભત્રિકોણગે ॥ ૩૭॥

શુભદૃષ્ટિયુતે વાપિ સ્વપ્રભોશ્ચ મહત્સુખમ્ ।
ગૃહે કલ્યાણસમ્પત્તિઃ પુત્રાદિસુખવર્દ્ધનમ્ ॥ ૩૮॥

વાહનામ્બરપશ્વાદિગોક્ષીરૈસ્સંકુલં ગૃહમ્ ।
લગ્નાષ્ટમવ્યયે સૂર્યે દાયેશાદ્વા તથૈવ ચ ॥ ૩૯॥

હૃદ્રોગો માનહાનિશ્ચ સ્થાનભ્રંશો મનોરુજા ।
ઇષ્ટ્બન્ધુવિયોગશ્ચ ઉદ્યોગસ્ય વિનાશનમ્ ॥ ૪૦॥

તાપજ્વરાદિપીડા ચ વ્યાકુલત્વં ભયં તથા ।
આત્મસમ્બન્ધિમરણમિષ્ટવસ્તુવિયોગકૃત્ ॥ ૪૧॥

દ્વિતીયદ્યૂનનાથે તુ દેહબાધા ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં સૂર્યપૂજાં ચ કારયેત્ ॥ ૪૨॥

મન્દસ્યાન્તર્ગતે ચન્દ્રે જીવદૃષ્ટિસમન્વિતે ।
સ્વોચ્ચે સ્વક્ષેત્રકેન્દ્રસ્થે ત્રિકોણે લાભગેઽપિ વા ॥ ૪૩॥

પૂર્ણે શુભગ્રહૈર્યુક્તે રાજપ્રીતિસમાગમઃ ।
મહારાજપ્રસાદેન વાહનામ્બરભૂષણમ્ ॥ ૪૪॥

સૌભાગ્યં સુખવૃદ્ધિં ચ ભૃત્યાનાં પરિપાલનમ્ ।
પિતૃમાતૃકુલે સૌખ્યં પશુવૃદ્ધિઃ સુખાવહા ॥ ૪૫॥

ક્ષીણે વા પાપસંયુક્તે પાપદૃષ્ટે વા નીચગે ।
ક્રૂરાંશકગતે વાપિ ક્રૂરક્ષેત્રગતેઽપિ વા ॥ ૪૬॥

જાતકસ્ય મહત્કષ્ટં રાજકોપો ધનક્ષયઃ ।
પિતૃમાતૃવિયોગશ્ચ પુત્રીપુત્રાદિરોગકૃત્ ॥ ૪૭॥

વ્યવસાયાત્ફલં નેષ્ટં નાનામાર્ગે ધનવ્યયઃ ।
અકાલે ભોજનં ચૈવ મૌષધસ્ય ચ ભક્ષણમ્ ॥ ૪૮॥

ફલમેતદ્દ્વિજાનીયાદાદૌ સૌખ્યં ધનાગમઃ ।
દાયેશાત્કેન્દ્રરાશિસ્થે ત્રિકોણે લાભગેઽપિ વા ॥ ૪૯॥

વાહનામ્બરપશ્વાદિભ્રાતૃવૃદ્ધિઃ સુખાવહા ।
પિતૃમાતૃસુખાવાપ્તિઃ સ્ત્રીસૌખ્યં ચ ધનાગમઃ ॥ ૫૦॥

મિત્રપ્રભુવશાદિષ્ટં સર્વસૌખ્યં શુભાવહમ્ ।
દાયેશાદ્દ્વાદશ ભાવે રન્ધ્રે વા બલવર્જિતે ॥ ૫૧॥

શયનં રોગમાલસ્યં સ્થાનભ્રષ્ટં સુખાપહમ્ ।
શત્રુવૃદ્ધિવિરોધં ચ બન્ધુદ્વેષમવાપ્નુયાત્ ॥ ૫૨॥

દ્વિતીયદ્યૂનનાથે તુ દેહાલસ્ય ભવિષ્યતિ ।
તદ્દોષશમનાર્થં ચ તિલહોમાદિકં ચરેત્ ॥ ૫૩॥

ગુડં ઘૃતં ચ દધ્નાક્તં તણ્ડુલં ચ યથાવિધિ ।
શ્વેતાં ગાં મહિષીં દદ્યાદાયુરારોગ્યવૃદ્ધયે ॥ ૫૪॥

મન્દસ્યાન્તર્ગતે ભૌમે કેન્દ્રલાભત્રિકોણગે ।
તુઙ્ગે સ્વક્ષેત્રગે વાપિ દશાધિપસમન્વિતે ॥ ૫૫॥

લગ્નાધિપેન સંયુક્તે આદૌ સૌખ્યં ધનાગમઃ ।
રાજપ્રીતિકરં સૌખ્યં વાહનામ્બરભૂષણમ્ ॥ ૫૬॥

સેનાપત્યં નૃપપ્રીતિઃ કૃષિગોધાન્યસમ્પદઃ ।
નૂતનસ્થાનનિર્માણં ભ્રાતૃવર્ગેષ્ટસૌખ્યકૃત્ ॥ ૫૭॥

નીચે ચાસ્તઙ્ગતે ભૌમે લગ્નાદષ્ટવ્યયસ્થિતે ।
પાપદૃષ્ટિયુતે વાપિ ધનહાનિર્ભવિષ્યતિ ॥ ૫૮॥

ચૌરાહિવ્રણશસ્ત્રાદિગ્રન્થિરોગાદિપીડનમ્ ।
ભ્રાતૃપિત્રાદિપીડા ચ દાયાદજનવિગ્રહઃ ॥ ૫૯॥

ચતુષ્પાજ્જીવહાનિશ્ચ કુત્સિતાન્નસ્ય ભોજનમ્ ।
વિદેશગમનં ચૈવ નાનમાર્ગે ધનવ્યયઃ ॥ ૬૦॥

અષ્ટમદ્યૂનનાથે તુ દ્વિતીયસ્થેઽથ વા યદિ ।
અપમૃત્યુભયં ચૈવ નાનાકષ્ટં પરાભવઃ ॥ ૬૧॥

તદ્દોષપરિહારાર્થં શાન્તિહોમં ચ કારયેત્ ।
વૃષદાનં પ્રકુર્વીત સર્વારિષ્ટનિવારણમ્ ॥ ૬૨॥

મન્દસ્યાન્તર્ગતે રાહૌ કલહશ્ચ મનોવ્યથા ।
દેહપીડા મનસ્તાપઃ પુત્રદ્વેષો રુજોભયમ્ ॥ ૬૩॥

અર્થવ્યયો રાજભયં સ્વજનાદિવિરોધિતા ।
વિદેશગમનં ચૈવ ગૃહક્ષેત્રાદિનાશનમ્ ॥ ૬૪॥

લગ્નાધિપેન સંયુક્તે યોગકારકસંયુતે ।
સ્વોચ્ચે સ્વક્ષેત્રગે કેન્દ્રે દાયેશાલ્લાભરાશિગે ॥ ૬૫॥

આદૌ સૌખ્યં ધનાવાપ્તિં ગૃહક્ષેત્રાદિસમ્પદમ્ ।
દેવબ્રાહ્મણભક્તિં ચ તીર્થયાત્રાદિકં લભેત્ ॥ ૬૬॥

ચતુષ્પાજ્જીવલાભઃ સ્યાદ્ગૃહે કલ્યાણવર્દ્ધનમ્ ।
મધ્યે તુ રાજભીતિશ્ચ પુત્રમિત્રવિરોધનમ્ ॥ ૬૭॥

મેષે કન્યાગતે વાપિ કુલીરે વૃષભે તથા ।
મીનકોદણ્ડસિંહેષુ ગજાન્તૈશ્વર્યમાદિશેત્ ॥ ૬૮॥

રાજસમ્માનભૂષાપ્તિં મૃદુલાભરસૌખ્યકૃત્ ।
દ્વિસપ્તમાધિપૈર્યુક્તે દેહબાધા ભવિષ્યતિ ॥ ૬૯॥

મૃત્યુઞ્જયં પ્રકુર્વીત છાગદાનં ચ કારયેત્ ।

વૃષદાનં પ્રકુર્વીત સર્વસમ્પત્સુખાવહમ્ ॥ ૭૦॥

મન્દસ્યાન્તર્ગતે જીવે કેન્દ્રે લાભત્રિકોણગે ।
લગ્નાધિપેન સંયુક્તે સ્વોચ્ચે સ્વક્ષેત્રગેઽપિ વા ॥ ૭૧॥

સર્વકાર્યાર્થસિદ્ધિઃ સ્યાચ્છોભનં ભવતિ ધ્રુવમ્ ।
મહારાજપ્રસાદેન ધનવાહનભૂષણમ્ ॥ ૭૨॥

સન્માનં પ્રભુસમ્માનં પ્રિયવસ્ત્રાર્થલાભકૃત્ ।
દેવતાગુરુભક્તિશ્ચ વિદ્વજ્જનસમાગમઃ ॥ ૭૩॥

દારપુત્રાદિલાભશ્ચ પુત્રકલ્યાણવૈભવમ્ ।
ષષ્ઠાષ્ટમવ્યયે જીવે નીચે વા પાપસંયુતે ॥ ૭૪॥

નિજસમ્બન્ધિમરણં ધનધાન્યવિનાશનમ્ ।
રાજસ્થાને જનદ્વેષઃ કર્યહાનિર્ભવિષ્યતિ ॥ ૭૫॥

વિદેશગમનં ચૈવ કુષ્ઠરોગાદિસમ્ભવઃ ।
દાયેશાત્કેન્દ્રકોણે વા ધને વા લાભગેઽપિ વા ॥ ૭૬॥

વિભવં દારસૌભાગ્યં રાજશ્રીધનસમ્પદઃ ।
ભોજનામ્બરસૌખ્યં ચ દાનધર્માદિકં ભવેત્ ॥ ૭૭॥

બ્રહ્મપ્તિષ્ઠાસિદ્ધિશ્ચ ક્રતુકર્મફલં તથા ।
અન્નદાનં મહાકીર્તિર્વેદાન્તશ્રવણાદિકમ્ ॥ ૭૮॥

દાયેશાત્ષષ્ઠરન્ધ્રે વા વ્યયે વા બલવર્જિતે ।
બન્ધુદ્વેષો મનોદુઃખં કલહઃ પદવિચ્યુતિ ॥ ૭૯॥

કુભોજનં કર્મહાની રાજદણ્ડાદ્ધનવ્યય ।
કારાગૃહપ્રવેશશ્ચ પુત્રદારાદિપીડનમ્ ॥ ૮૦॥

દ્વિતીયદ્યૂનનાથે તુ દેહવાધા મનોરુજઃ ।
આત્મસમ્બન્ધમરણં ભવિષ્યતિ ન સંશયઃ ॥ ૮૧॥

તદ્દોષપરિહારાર્થં શિવસાહસ્રકં જપેત્ ।
સ્વર્ણદાનં પ્રકુર્વીત હ્યારોગ્યં ભવતિ ધ્રુવમ્ ॥ ૮૨॥

અથ બુધાન્તર્દશાફલાધ્યાયઃ ॥ ૫૮॥

મુક્તાવિદ્રુમલાભશ્ચ જ્ઞાનકર્મસુખાદિકમ્ ।
વિદ્યામહત્ત્વં કીર્તિશ્ચ નૂતનપ્રભુદર્શનમ્ ॥ ૧॥

વિભવં દારપુત્રાદિ પિતૃમાતૃસુખાવહમ્ ।
સ્વોચ્ચાદિસ્થેઽથ નીચેઽસ્તે ષષ્ઠાષ્ટમવ્યયરાશિગે ॥ ૨॥

પાપયુક્તેઽથવા દૃષ્ટે ધનધાન્યપશુક્ષયઃ ।
આત્મબન્ધુવિરોધશ્ચ શૂલરુગાદિસમ્ભવઃ ॥ ૩॥

રાજકાર્યકલાપેન વ્યાકુલો ભવ્તિ ધ્રુવમ્ ।
દ્વિતીયદ્યૂનનાથે તુ દારક્લેશો ભવિષ્યતિ ॥ ૪॥

આત્મસમ્બન્ધિમરણં વાતશૂલાદિસમ્ભવઃ ।
તદ્દોષપરિહારાર્થં વિષ્ણુસાહસ્રકં જપેત્ ॥ ૫॥

બુધસ્યાન્તર્ગતે કેતૌ લગ્નાત્કેન્દ્રત્રિકોણગે ।
શુભયુક્તે શુભૈર્દૃષ્ટે લગ્નાધિપસમન્વિતે ॥ ૬॥

યોગકારકસમ્બન્ધે દાયેશાત્કેન્દ્રલાભગે ।
દેહસૌખ્યં ધનાલ્પત્વં બન્ધુસ્નેહમથાદિશેત્ ॥ ૭॥

ચતુષ્પાજ્જીવલાભઃ સ્યાત્સંચારેણ ધનાગમઃ ।
વિદ્યાકીર્તિપ્રસઙ્ગશ્ચ સમાનપ્રભુદર્શનમ્ ॥ ૮॥

ભોજનામ્બરસૌખ્યં ચ હ્યાદૌ મધ્યે સુખાવહમ્ ।
દાયેશાદ્યદિ રન્ધ્રસ્થે વ્યયે વા પાપસંયુતે ॥ ૯॥

વાહનાત્પતનં ચૈવ પુત્રક્લેશાદિસમ્ભવઃ ।
ચૌરાદિરાજભીતિશ્ચ પાપકર્મરતઃ સદા ॥ ૧૦॥

વૃશ્ચિકાદિવિષાદ્ભીતિર્નીચૈઃ કલહસંભવઃ ।
શોકરોગાદિદુઃખં ચ નીચસઙ્ગાદિકં ભવેત્ ॥ ૧૧॥

દ્વિતીયદ્યૂનનાથે તુ દેહજાડ્યં ભવિષ્યતિ ।
તદ્દોષપરિહારાય છાગદાનં તુ કારયેત્ ॥ ૧૨॥

સૌમ્યસ્યાન્તર્ગતે શુક્રે કેન્દ્રે લાભે ત્રિકોણગે ।
સત્કથાપુણ્યધર્માદિસંગ્રહઃ પુણ્યકર્મકૃત્ ॥ ૧૩॥

મિત્રપ્રભુવશાદિષ્ટ ક્ષેત્રલાભઃ સુખં ભવેત્ ।
દશાધિપાત્કેન્દ્રગતે ત્રિકોણે લાભગેઽપિ વા ॥ ૧૪॥

તત્કાલે શ્રિયમાપ્નોતિ રાજશ્રીધનસમ્પદઃ ।
વાપીકૂપતડાગદિદાનધર્માદિસંગ્રહઃ ॥ ૧૫॥

વ્યવસાયાત્ફલાધિક્યં ધનધાન્યસમૃદ્ધિકૃત્ ।
દાયેશાત્ષષ્ઠરન્ધ્રસ્થે વ્યયે વા બલવર્જિતે ॥ ૧૬॥

હૃદ્રોગો માનહાનિશ્ચ જ્વરાતીસારપીડનમ્ ।
આત્મબન્ધુવિયોગશ્ચ સંસારે ભવતિ ધ્રુવમ્ ॥ ૧૭॥

આત્મકષ્ટં મનસ્તાપદાયકં દ્વિજસત્તમ ।
દ્વિતીયદ્યૂનનાથે તુ હ્યપમૃત્યુર્ભવિષ્યતિ ॥ ૧૮॥

તદ્દોષપરિહારાર્થં દુર્ગાદેવીજપં ચરેત્ ।
જગદમ્બાપ્રસાદેન તતઃ શાન્તિમવાપ્નુયાત્ ॥ ૧૯॥

સૌમ્યસ્યાન્તર્ગતે સૂર્યે સ્વોચ્ચે સ્વક્ષેત્રકેન્દ્રગે ।
ત્રિકોણે ધનલાભે તુ તુઙ્ગાંશે સ્વાંશગેઽપિ વા ॥ ૨૦॥

રાજપ્રસાદસુભાગ્યં મિત્રપ્રભુવશાત્સુખમ્ ।
ભૂમ્યાત્મજેન સંદૃષ્ટે આદૌ ભૂલાભમાદિશેત્ ॥ ૨૧॥

લગ્નાધિપેન સંદૃષ્ટે બહુસૌખ્યં ધનાગમમ્ ।
ગ્રામભૂમ્યાદિલાભં ચ ભોજનામ્બરસૌખ્યકૃત્ ॥ ૨૨॥

લગ્નાષ્ટમવ્યયે વાપિ શન્યારફણિસંયુતે ।
દાયેશાદ્રિપુરન્ધ્રસ્થે વ્યયે વા બલવર્જિતે ॥ ૨૩॥

ચૌરાદિશસ્ત્રપીડા ચ પિત્તાધિક્યં ભવિષ્યતિ ।
શિરોરુઙ્મનસસ્તાપ ઇષ્ટબન્ધુવિયોગકૃત્ ॥ ૨૪॥

દ્વિતીયસપ્તમાધીશે હ્યપમૃત્યુર્ભવિશ્યતિ ।
તદ્દોષપરિહારાર્થં શાન્તિં કુર્યાદ્યથાવિધિ ॥ ૨૫॥

સૌમ્યસ્યાન્તર્ગતે ચન્દ્રે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સ્વોચ્ચે વા સ્વર્ક્ષગે વાપિ ગુરુદૃષ્ટિસમન્વિતે ॥ ૨૬॥

યોગસ્થાનાધિપત્યેન યોગપ્રાબલ્યમાદિશેત્ ।
સ્ત્રીલાભં પુત્રલાભં ચ વસ્ત્રવાહનભૂષણમ્ ॥ ૨૭॥

નૂતનાલયલાભં ચ નિત્યં મિષ્ટાન્નભોજનમ્ ।

ગીતવાદ્યપ્રસંગં ચ શાસ્ત્રવિદ્યાપરિશ્રમમ્ ॥ ૨૮॥

દક્ષિણાં દિશમાશ્રિત્ય પ્રયાણં ચ ભવિષ્યતિ ।
દ્વીપાન્તરાદિવસ્ત્રાણાં લાભશ્ચૈવ ભવિષ્યતિ ॥ ૨૯॥

મુક્તાવિદ્રુમરત્નાનિ ધૌતવસ્ત્રાદિકં લભેત્ ।
નીચારિક્ષેત્રસંયુક્તે દેહબાધા ભવિષ્યતિ ॥ ૩૦॥

દાયેશાત્કેન્દ્રકોણસ્થે દુશ્ચિક્યે લાભગેઽપિ વા ।
તદ્ભુક્ત્યાદૌ પુણ્યતીર્થસ્થાનદૈવતદર્શનમ્ ॥ ૩૧॥

મનોધૈર્યં હૃદુત્સાહો વિદેશધનલાભકૃત્ ।
દાયેશાત્ષષ્ઠરન્ધ્રે વા વ્યયે વા પાપસંયુતે ॥ ૩૨॥

ચોરાગ્નિનૃપભીતિશ્ચ સ્ત્રીસમાગમતો ભવેત્ ।
દુષ્કૃતિર્ધનહાનિશ્ચ કૃષિગોશ્વાદિનાશકૃત્ ॥ ૩૩॥

દ્વિતીયદ્યૂનનાથે તુ દેહબાધા ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં દુર્ગાદેવીજપં ચરેત્ ॥ ૩૪॥

વસ્ત્રદાનં પ્રકુર્વીત આયુર્વૃદ્ધિસુખાવહમ્ ।
જગદમ્બાપ્રસાદેન તતઃ સુખમવાપ્નુયાત્ ॥ ૩૫॥

સૌમ્યસ્યાન્તર્ગતે ભૌમે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સ્વોચ્ચે વા સ્વર્ક્ષગે વાપિ લગ્નાધિપસમન્વિતે ॥ ૩૬॥

રાજાનુગ્રહશાન્તિં ચ ગૃહે કલ્યાણસમ્ભવમ્ ।
લક્ષ્મીકટાક્ષચિહ્નાનિ નષ્ટરાજ્યાર્થમાપ્નુયાત્ ॥ ૩૭॥

પુત્રોત્સવાદિસન્તોષં ગૃહે ગોધનસંકુલમ્ ।
ગૃહક્ષેત્રાદિલાભં ચ ગજવાજિસમન્વિતમ્ ॥ ૩૮॥

રાજપ્રીતિકરં ચૈવ સ્ત્રીસૌખ્યં ચાતિશોભનમ્ ।
નીચક્ષેત્રસમાયુક્તે હ્યષ્ટમે વા વ્યયેઽપિ વા ॥ ૩૯॥

પાપદૃષ્ટિયુતે વાપિ દેહપીડા મનોવ્યથા ।
ઉદ્યોગભઙ્ગો દશાદૌ સ્વગ્રામે ધાન્યનશનમ્ ॥ ૪૦॥

ગ્રંથિશસ્ત્રવ્રણાદીનાં ભયં તાપજ્વરાદિકમ્ ।
દાયેશાત્કેન્દ્રગે ભૌમે ત્રિકોણે લાભગેઽપિ વા ॥ ૪૧॥

શુભદૃષ્ટે ધનપ્રાપ્તિર્દેહસૌખ્યં ભવેનૃણામ્ ।
પુત્રલાભો યશોવૃદ્ધિર્ભ્રાતૃવર્ગો મહાપ્રિયઃ ॥ ૪૨॥

દાયેશાદથ રન્ધ્રસ્થે વ્યયે વા પાપસંયુતે ।
તદ્ભુક્ત્યાદૌ મહાક્લેશો ભ્રાતૃવર્ગે મહદ્ભયમ્ ॥ ૪૩॥

નૃપાગ્નિચૌરભીતિશ્ચ પુત્રમિત્રવિરોધનમ્ ।
સ્થાનભ્રંશો ભવેદાદૌ મધ્યે સૌખ્યં ધનાગમઃ ॥ ૪૪॥

અન્તે તુ રાજભીતિઃ સ્યાત્સ્થાનભ્રંશોઽથવાપિવા ।
દ્વિતીયદ્યૂનનાથે તુ હ્યપમૃત્યુભયં ભવેત્ ॥ ૪૫॥

ગોદાનં ચ પ્રકુર્વીત મૃત્યુઞ્જયજપં ચરેત્ ।
શઙ્કરસ્ય પ્રસાદેન તતઃ સુકહ્મવાપ્નુયાત્ ॥ ૪૬॥

બુધસ્યાન્તર્ગતે રાહૌ કેન્દ્રલાભત્રિકોણગે ।
કુલીરે કુમ્ભગે વાપિ કન્યાયાં વૃષભેપિ વા ॥ ૪૭॥

રાજસમ્માનકીર્તિં ચ ધનં ચ પ્રભવિષ્યતિ ।
પુણ્યતીર્થસ્થાનલાભો દેવતાદર્શનં તથા ॥ ૪૮॥

ઇષ્તાપૂર્તે ચ મહતો માનશ્ચામ્બરલાભકૃત્ ।
ભુક્ત્યાદૌ દેહપીડા ચ ત્વન્તે સૌખ્યં વિનિર્દિશેત્ ॥ ૪૯॥

લગ્નાષ્ટવ્યયરાશિસ્થે તદ્ભુક્તૌ ધનનાશનમ્ ।
ભુક્ત્યાદૌ દેહનાશશ્ચ વાતજ્વરમજીર્ણકૃત્ ॥ ૫૦॥

લગ્નાદુપચયે રાહૌ શુભગ્રહસમન્વિતે ।
રાજસંલાપસન્તોષો નૂતનપ્રભુદર્શનમ્ ॥ ૫૧॥

દાયેશાદ્દ્વાદશે વાપિ હ્યષ્ટમે પાપસંયુતે ।
નિષ્ઠુરં રાજકાર્યાણિ સ્થાનભ્રંશો મહદ્ભયમ્ ॥ ૫૨॥

બન્ધનં રોગપીડા ચ નિજબન્ધુમનોવ્યથા ।
હૃદ્રોગો માનહાનિશ્ચ ધનહાનિર્ભવિષ્યતિ ॥ ૫૩॥

દ્વિતીયસપ્તમસ્થે વા હ્યપમૃત્યુર્ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં દુર્ગાલક્ષ્મીજપં ચરેત્ ॥ ૫૪॥

શ્વેતાં ગાં મહિષીં દદ્યાદાયુઆરોગ્યદાયિનીમ્ ।
જગદમ્બાપ્રસાદેન તતઃ સુખમવાપ્નુયાત્ ॥ ૫૫॥

બુધસ્યાન્તર્ગતે જીવે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સ્વોચ્ચે વા સ્વર્ક્ષગે વાપિ લાભે વા ધનરાશિગે ॥ ૫૬॥

દેહસૌખ્યં ધનાવાપ્તી રાજપ્રીતિસ્તથૈવ ચ ।
વિવાહોત્સવકાર્યાણિ નિત્યં મિષ્ટાન્નભોજનમ્ ॥ ૫૭॥

ગોમહિષ્યાદિલાભશ્ચ પુરાણસ્ર્/અવણાદિકમ્ ।
દેવતાગુરુભક્તિશ્ચ દાનધર્મમખાદિકમ્ ॥ ૫૮॥

યજ્ઞકર્મપ્રવૃદ્ધિશ્ચ શિવપૂજાફલં તથા ।
નીચે વાસ્તંગતે વાપિ ષષ્ઠાષ્ટવ્યયગેઽપિ વા ॥ ૫૯॥

શન્યારદૃષ્ટસંયુક્તે કલહો રાજવિગ્રહઃ ।
ચૌરાદિદેહપીડા ચ પિતૃમાતૃવિનાશ્નમ્ ॥ ૬૦॥

માનહાનિ રાજદણ્ડો ધનહાનિર્ભવિષ્યતિ ।
વિષાહિજ્વરપીડા ચ કૃષિભૂમિવિનાશનમ્ ॥ ૬૧॥

દયેશાત્કેન્દ્રકોણે વા લાભે વા બલસંયુતે ।
બન્ધુપુત્રહૃદુત્સાહો શુભં ચ ધનસંયુતમ્ ॥ ૬૨॥

પશુવૃદ્ધિર્યશોવૃદ્ધિરન્નદાનાદિકં ફલમ્ ।
દાયેશાત્ષષ્ઠરન્ધ્રે વા વ્યયે વા બલવર્જિતે ॥ ૬૩॥

અઙ્ગતાપશ્ચ વૈકલ્યં દેહબાધા ભ્વિષ્યતિ ।
કલત્રબન્ધુવૈષમ્યં રાજકોપો ધનક્ષયઃ ॥ ૬૪॥

અકસ્માત્કલહાદ્ભીતિઃ પ્રમાદો દ્વિજતો ભયમ્ ।
દ્વિતીયસપ્તમસ્થે વા દેહબાધા ભવિષ્યતિ ॥ ૬૫॥

તદ્દોષપરિહારાર્થં શિવસાહસ્રકં જપેત્ ।
ગોભૂરિરણ્યદાનેન સર્વારિષ્ટં વ્યપોહતિ ॥ ૬૬॥

સૌમ્યસ્યાન્તર્ગતે મન્દે સ્વોચ્ચે સ્વક્ષેત્રકેન્દ્રગે ।
ત્રિકોણલાભગે વાપિ ગૃહે કલ્યાણવર્દ્ધનમ્ ॥ ૬૭॥

રાજ્યલાભં મહોત્સાહં ગૃહં ગોધનસંકુલમ્ ॥ ૬૮॥

શુભસ્થાનફલવાપ્તિં તીર્થવાસં તથાદિશેત્ ।
અષ્ટમે વા વ્યયે મન્દે દાયેશાદ્વા તથૈવ ચ ॥ ૬૯॥

અરાતિદુઃખબાહુલ્યં દારપુત્રાદિપીડનમ્ ।
બુદ્ધિભ્રંશો બન્ધુનાશઃ કર્મનાશો મનોરુજઃ ॥ ૭૦॥

વિદેશગમનં ચૈવ દુઃસ્વપ્નાદિપ્રદર્શનમ્ ।
દ્વિતીયદ્યૂનનાથે તુ હ્યપમૃત્યુર્ભવિષ્યતિ ॥ ૭૧॥

તદ્દોષપરિહારાર્થં મૃત્યુઞ્જયજપં ચરેત્ ।
કૃષ્ણાં ગાં મહિષીં દદ્યાદાયુરારોગ્યવૃદ્ધયે ॥ ૭૨॥

---

અથ કેત્વન્તર્દશાફલાધ્યાયઃ ॥ ૫૯॥

કેન્દ્રે ત્રિકોણલાભે વા કેતૌ લગ્નેશસંયુતે ।
ભાગ્યકર્મસુસમ્બન્ધે વાહનેશસમન્વિતે ॥ ૧॥

તદ્ભુક્તૌ ધનધાન્યાદિ ચતુષ્પાજ્જીવલાભકૃત્ ।
પુત્રદારાદિસૌખ્યં ચ રાજપ્રીતિમનોરુજઃ ॥ ૨॥

ગ્રામભૂમ્યાદિલાભશ્ચ ગૃહં ગોધનસંકુલમ્ ।
નીચાસ્તખેટસંયુક્તે હ્યષ્ટમે વ્યયગેઽપિ વા ॥ ૩॥

હૃદ્રોગો માનહાનિશ્ચ ધનધાન્યપશુક્ષયઃ ।
દારપુત્રાદિપીડા ચ મનશ્ચાંચલ્યમેવ ચ ॥ ૪॥

દ્વિતીયદ્યૂનનાથેન સમ્બન્ધે તત્ર સંસ્થિતે ।
અનારોગ્યં મહત્કષ્ટમાત્મબન્ધુવિયોગકૃત્ ॥ ૫॥

દુર્ગાદેવીજપં કુર્યાન્મૃત્યુઞ્જયજપં ચરેત્ ।
એવં સ્વાન્તર્ગતે કેતૌ તતઃ સુખમવાપ્નુયાત્ ॥ ૬॥

કેતોરન્તર્ગતે શુક્રે સ્વોચ્ચે સ્વક્ષેત્રસંયુતે ।
કેન્દ્રત્રિકોણલાભે વા રાજ્યનાથેન સંયુતે ॥ ૭॥

રાજપ્રીતિં ચ સૌભાગ્યં દિશાત્સ્વામ્બરસંકુલમ્ ।
તત્કાલે શ્રિયમાપ્નોતિ ભાગ્યકર્મેશસંયુતે ॥ ૮॥

નષ્ટરાજ્યધનપ્રાપ્તિં સુખવાહનસુત્તમમ્ ।
સેતુસ્નાનાદિકં ચૈવ દેવતાદર્શનં મહત્ ॥ ૯॥

મહારાજપ્રસાદેન ગ્રામભૂમ્યાદિલાભકૃત્ ।

દાયેશાત્કેન્દ્રકોણે વા દુશ્ચિક્યે લાભગેઽપિ વા ॥ ૧૦॥

દેહારોગ્યં શુભં ચૈવ ગૃહે કલ્યાણશોભનમ્ ।
ભોજનામ્બરભૂષાપ્તિરથદોલાદિલાભકૃત્ ॥ ૧૧॥

દાયેશાદ્રિપુરન્ધ્રસ્થે વ્યયે વા પાપસંયુતે ।
અકસ્માત્કલહં ચૈવ પશુધાન્યાદિપીડનમ્ ॥ ૧૨॥

નીચસ્થે ખેટસંયુક્તે લગ્નાત્ષષ્ઠાષ્ટરાશિગે ।
સ્વબન્ધુજનવૈષમ્યં શિરોક્ષિવ્રણપીડનમ્ ॥ ૧૩॥

હૃદ્રોગં માનહાનિં ચ ધનધાન્યપશુક્ષયમ્ ।
કલત્રપુત્રપીડાયાઃ સઞ્ચારં ચ સમાદિશેત્ ॥ ૧૪॥

દ્વિતીયદ્યૂનનાથે તુ દેહજાડ્યં મનોરુજમ્ ।
તદ્દોષપરિહારાર્થં દુર્ગાદેવીજપં ચરેત્ ।
શ્વેતાં ગાં મહિષીં દદ્યાદાયુઆરોગ્યવૃદ્ધયે ॥ ૧૫॥

કેતોરન્તર્ગતે સૂર્યે સ્વોચ્ચે સ્વક્ષેત્રગેઽપિ વા ।
કેન્દ્રત્રિકોણલાભે વા શુભયુક્તનિરીક્ષિતે ॥ ૧૬॥

ધનધાન્યાદિલાભશ્ચ રાજાનુગ્રહવૈભવમ્ ।
અનેકશુભકાર્યાણિ ચેષ્ટસિદ્ધિઃ સુખાવહા ॥ ૧૭॥

અષ્ટમવ્યયરાશિસ્થે પાપગ્રહસમન્વિતે ।
તદ્ભુક્તૌ રાજભીતિશ્ચ પિતૃમાતૃવિયોગકૃત્ ॥ ૧૮॥

વિદેશગમનં ચૈવ ચૌરાહિવિષપીડનમ્ ।
રાજમિત્રવિરોધશ્ચ રાજદણ્ડાદ્ધનક્ષયઃ ॥ ૧૯॥

શોકરોગભયં ચૈવ ઉષ્ણાધિક્યં જ્વરો ભવેત્ ।
દાયેશાત્લેન્દ્રકોણે વા લાભે વા ધનસંસ્થિતે ॥ ૨૦॥

દેહસૌખ્યં ચાર્થલાભ૦ પુત્રલાભો મનોદૃઢમ્ ।
સર્વકાર્યાર્થસિદ્ધિઃ સ્યાત્સ્વલ્પગ્રામાધિપત્યયુક્ ॥ ૨૧॥

દાયેશાદ્રન્ધ્રરિઃફે વા સ્થિતે વા પાપસંયુતે ।
અન્નવિઘ્નો મનોબીતિર્ધનધાન્યપશુક્ષયઃ ॥ ૨૨॥

આદૌ મધ્યે મહાક્લેશાનન્તે સૌખ્યં વિનિર્દિશેત્ ।
દ્વિતીયસપ્તમાધીશે હ્યપમૃત્યુર્ભવિષ્યતિ ॥ ૨૩॥

તસ્ય શાન્તિં પ્રકુર્વીત સ્વર્ણં ધેનું પ્રદાપયેત્ ।
ભાસ્કરસ્ય પ્રસાદેન તતઃ સુખમવાપ્નુયાત્ ॥ ૨૪॥

કેતોરન્તર્ગતે ચન્દ્રે સ્વોચ્ચે સ્વક્ષેત્રગેઽપિ વા ।
કેન્દ્રત્રિકોણલાભે વા ધને શુભસમન્વિતે ॥ ૨૫॥

રાજપ્રીતિર્મહોત્સાહઃ કલ્યાણં ચ મહત્સુખમ્ ।
મહારાજપ્રસાદેન ગૃહભૂમ્યાદિલાભકૃત્ ॥ ૨૬॥

ભોજનામ્બરપશ્વાદિવ્યવસાયેઽધિકં ફલમ્ ।
અશ્વવાહનલાભશ્ચ વસ્ત્રાભરણભૂષણમ્ ॥ ૨૭॥

દેવાલયતડાગાદિપુણ્યધર્માદિસઙ્ગ્રહમ્ ।
પુત્રદારાદિસૌખ્યં ચ પૂર્ણચન્દ્રઃ પ્રયચ્છતિ ॥ ૨૮॥

ક્ષીણે વા નીચગે ચન્દ્રે ષષ્ઠાષ્ટમવ્યયરાશિગે ।
આત્મસૌખ્યં મનસ્તાપં કાર્યવિઘ્નં મહદ્ભયમ્ ॥ ૨૯॥

પિતૃમાતૃવિયોગં ચ દેહજાડ્યં મનોવ્યથામ્ ।
વ્યવસાયાત્ફલં કષ્ટં પશુનાશં ભયં વદેત્ ॥ ૩૦॥

દાયેશાત્કેન્દ્રકોણે વા લાભે વા બલસંયુતે ।
કૃષિગોભૂમિલાભં ચ ઇષ્ટબન્ધુસમાગમમ્ ॥ ૩૧॥

તસ્માત્સ્વકાર્યસિદ્ધિં ચ ગૃહે ગોક્ષીરમેવ ચ ।
ભુક્ત્યાદૌ શુભમારોગ્યં મધ્યે રાજપ્રિયં શુભમ્ ॥ ૩૨॥

અન્તે તુ રાજભીતિં ચ વિદેશગમનં તથા ।
દૂરયાત્રાદિસઞ્ચારં સમ્બન્ધિજનપૂજનમ્ ॥ ૩૩॥

દાયેશાત્ષષ્ઠરિઃફે વા રન્ધ્રે વા બલવર્જિતે ।
ધનધાન્યાદિહાનિશ્ચ મનોવ્યાકુલમેવ ચ ॥ ૩૪॥

સ્વબન્ધુજનવૈરં ચ ભ્રાતૃપીડા તથૈવ ચ ।
નિધનાધિપદોષેણ દ્વિસપ્તપતિસંયુતે ॥ ૩૫॥

અપમૃત્યુભયં તસ્ય શાન્તિં કુર્યાદ્યથાવિધિ ।
ચન્દ્રપ્રીતિકરીં ચૈવ હ્યાયુરારોગ્યસિદ્ધયે ॥ ૩૬॥

કેતોરન્તર્ગતે ભૌમે લગ્નાત્કેન્દ્રત્રિકોણગે ।

સ્વોચ્ચે સ્વક્ષેત્રગે વાઽપિ શુભગ્રહયુતેક્ષિતે ॥ ૩૭॥

આદૌ શુભફલં ચૈવ ગ્રામભૂમ્યાદિલાભકૃત્ ।
ધનધાન્યાદિલાભશ્ચ ચતુષ્પાજ્જીવલાભકૃત્ ॥ ૩૮॥

ગૃગારામક્ષેત્રલાભો રાજાનુગ્રહવૈભવમ્ ।
ભાગ્યે કર્મેશસમ્બન્ધે ભૂલાભઃ સૌખ્યમેવ ચ ॥ ૩૯॥

દાયેશાત્કેન્દ્રકોણે વા દુશ્ચિક્યે લાભગેઽપિ વા ।
રાજપ્રીતિયશોલાભઃ પુત્રમિત્રાદિસૌખ્યકૃત્ ॥ ૪૦॥

તથાઽષ્ટમવ્યયે ભૌમે દાયેશાદ્ધનગેઽપિ વા ।
દ્રુતં કરોતિ મરણં વિદેશે ચાપદં ભ્રમમ્ ॥ ૪૧॥

પ્રમેહમૂત્રકૃચ્છ્રાદિચૌરાદિનૃપપીડનમ્ ।
કલહાદિ વ્યથાયુક્તં કિઞ્ચિત્સુખવિવર્દ્ધનમ્ ॥ ૪૨॥

દ્વિતીયદ્યૂનનાથે તુ તાપજ્વરવિષાદ્ભયમ્ ।
દારપીડા મનઃક્લેશમપમૃત્યુભયં ભવેત્ ॥ ૪૩॥

અણ્ડ્વાહં પ્રદદ્યાત્તુ સર્વસમ્પત્સુખાવહમ્ ।
તતઃ શાન્તિમવાપ્નોતિ ભૌમગ્રહપ્રસાદતઃ ॥ ૪૪॥

કેતોરન્તર્ગતે રાહૌ સ્વોચ્ચે મિત્રસ્વરાશિગે ।
કેન્દ્રત્રિકોણે લાભે વા દુશ્ચિક્યે ધનસંજ્ઞકે ॥ ૪૫॥

તત્કાલે ધનલાભઃ સ્યાત્સઞ્ચારો ભવતિ ધ્રુવમ્ ।
મ્લેચ્છપ્રભુવશાત્સૌખ્યં ધન્ધાન્યફલાદિકમ્ ॥ ૪૬॥

ચતુષ્પાજ્જીવલાભઃ સ્યાદ્ગ્રામભૂમ્યાદિલાભકૃત્ ।
ભુક્ત્યાદૌ ક્લેશમાપ્નોતિ મધ્યાન્તે સૌખ્યમાપ્નુયાત્ ॥ ૪૭॥

રન્ધ્રે વા વ્યયગે રાહૌ પાપસંદૃષ્ટસંયુતે ।
બહુમૂત્રં કૃશં દીહં શીતજ્વરવિષાદ્ભયમ્ ॥ ૪૮॥

ચાતુર્થિકજ્વરં ચૈવ ક્ષુદ્રોપદ્રવપીડનમ્ ।
અકસ્માત્કલહં ચૈવ પ્રમેહં શૂલમાદિશેત્ ॥ ૪૯॥

દ્વિતીયસપ્તમસ્થે વા તદા ક્લેશં મહદ્ભયમ્ ।
તદ્દોષપરિહારાર્થં દુર્ગાદેવીજપં ચરેત્ ॥ ૫૦॥

કેતોરન્તર્ગતે જીવે કન્દ્રે લાભે ત્રિકોણગે ।
સ્વોચ્ચે સ્વક્ષેત્રગે વાપિ લગ્નાધિપસમન્વિતે ॥ ૫૧॥

કર્મભાગ્યાધિપૈર્યુક્તે ધનધાન્યાર્થસમ્પદમ્ ।
રાજપ્રીતિં તદોત્સાહમશ્વાંદોલ્યાદિકં દિશેત્ ॥ ૫૨॥

ગૃહે કલ્યાણસમ્પત્તિં પુત્રલાભં મહોત્સવહમ્ ।
પુણ્યતીર્થં મહોત્સાહં સત્કર્મ ચ સુખાવહમ્ ॥ ૫૩॥

ઇષ્ટદેવપ્રસાદેન વિજયં કાર્યલાભકૃત્ ।
રાજસંલ્લાપકાર્યાણિ નૂતનપ્રભુદર્શનમ્ ॥ ૫૪॥

ષષ્ઠાષ્ટમવ્યયે જીવે દાયેશાન્નીચગેઽપિ વા ।
ચૌરાહિવ્રણભીતિં ચ ધનધાન્યાદિનાશનમ્ ॥ ૫૫॥

પુત્રદારાવિયોગં ચ ત્વતીવક્લેશસમ્ભવમ્ ।
આદૌ સુભફલં ચૈવ અન્તે ક્લેશકરં વદેત્ ॥ ૫૬॥

દાયેશાત્કેન્દ્રકોણે વા દુશ્ચિક્યે લાભગેઽપિ વા ।
શુભયુક્તે નૃપપ્રીતિર્વિચિત્રામ્બરભૂષણમ્ ॥ ૫૭॥

દૂરદેશપ્રયાણં ચ સ્વબન્ધુજનપોષણમ્ ।
ભોજનામ્બરપશ્વાદિ ભુક્ત્યાદૌ દેહપીડનમ્ ॥ ૫૮॥

અન્તે તુ સ્થાનચલનમકસ્માત્કલહો ભવેત્ ।
દ્વિતીયદ્યૂનનાથે તુ હ્યપમૃત્યુર્ભવિષ્યતિ ॥ ૫૯॥

તદ્દોષપરિહારાર્થં શિવસાહસ્રકં જપેત્ ।
મહામૃત્યુઞ્જયં જાપ્યં સર્વોપદ્રવનાશનમ્ ॥ ૬૦॥

કેતોરન્તર્ગતે મન્દે સ્વદશાયાં તુ પીડનમ્ ।
બન્ધોઃ ક્લેશો મનસ્તાપશ્ચતુષ્પાજ્જીવલાભકૃત્ ॥ ૬૧॥

રાજકાર્યકલાપેન ધનનાશો મહદ્ભયમ્ ।
સ્થાનાચ્ચ્યુતિઃ પ્રવાસશ્ચ માર્ગે ચૌરભયં ભવેત્ ॥ ૬૨॥

આલસ્યં મનસો હાનિશ્ચાષ્ટમે વ્યયરાશિગે ।
મીનત્રિકોણગે મન્દે તુલાયાં સ્વર્ક્ષગેઽપિ વા ॥ ૬૩॥

કેન્દ્રત્રિકોણલાભે વા દુશ્ચિક્યે વા શુભાંશકે ।
શુભદૃષ્ટયુતે ચૈવ સર્વકાર્યાર્થસાધનમ્ ॥ ૬૪॥

સ્વપ્રભોશ્ચ મહત્સૌખ્યં ભ્રમણં ચ સુખાવહમ્ ।
સ્વગ્રામે સુખસમ્પત્તિઃ સ્વવર્ગે રાજદર્શનમ્ ॥ ૬૫॥

દાયેશાત્ષષ્ઠરિઃફે વા અષ્ટમે પાપસંયુતે ।
દેહતાપો મનસ્તાપઃ કાર્યે વિઘ્નો મહદ્ભયમ્ ॥ ૬૬॥

આલસ્યં માનહાનિશ્ચ પિતૃમાત્રોર્વિનાશનમ્ ।
દ્વિતીયદ્યૂનનાથે તુ હ્યપમૃત્યુભયં ભવેત્ ॥ ૬૭॥

તદ્દોષપૈર્હારાર્થં તિલહોમં ચ કારયેત્ ।
કૃષ્ણાં ગાં મહિષીં દદ્યાદાયુરારોગ્યવૃદ્ધયે ॥ ૬૮॥

કેતોરન્તર્ગતે સૌમ્યે કેન્દ્રલાભત્રિકોણગે ।
સ્વોચ્ચે સ્વક્ષેત્રસંયુક્તે રાજ્યલાભો મહત્સુખમ્ ॥ ૬૯॥

સત્કથાશ્રવણં દાનં ધર્મસિદ્ધિઃ સુખાવહા ।
ભૂલાભઃ પુત્રલાભશ્ચ શુભગોષ્ઠીધનાગમઃ ॥ ૭૦॥

અયત્નાદ્ધર્મલબ્ધિશ્ચ વિવાહશ્ચ ભવિષ્યતિ ।
ગૃહે શુભકરં કર્મ વસ્ત્રાભરણભૂષણમ્ ॥ ૭૧॥

ભાગ્યકર્માધિપૈર્યુક્તે ભાગ્યવૃદ્ધિઃ સુખાવહા ।
વિદ્વદ્ગોષ્ઠીકથાભિશ્ચ કાલક્ષેપો ભવિષ્યતિ ॥ ૭૨॥

ષષ્ઠાષ્ટમવ્યયે સૌમ્યે મન્દારાહિયુતેક્ષિતે ।
વિરોધો રાજવર્ગૈશ્ચ પરગેહનિવાસનમ્ ॥ ૭૩॥

વાહનામ્બરપશ્વાદિધનધાન્યાદિનાશકૃત્ ।
ભુક્ત્યાદૌ શોભનં પ્રોક્તં મધ્યે સૌખ્યં ધનાગમઃ ॥ ૭૪॥

અન્તે ક્લેશકરં ચૈવ દારપુત્રાદિપીડનમ્ ।
દાયેશાત્કેન્દ્રગે સૌમ્યે ત્રિકોણે લાભગેઽપિ વા ॥ ૭૫॥

દેહારોગ્યં મહાંલ્લાભઃ પુત્રકલ્યાણવૈભવમ્ ।
ભોજનામ્બરપશ્વાદિવ્યવસાયેઽધિકં ફલમ્ ॥ ૭૬॥

દાયેશાત્ષષ્ઠરન્ધ્રે વા વ્યયે વા બલવર્જિતે ।
તદ્ભુક્ત્યાદૌ મહાક્લેશો દારપુત્રાદિપીડનમ્ ॥ ૭૭॥

રાજભીતિકરશ્ચૈવ મધ્યે તીર્થકરો ભવેત્ ।

દ્વિતીયદ્યૂનનાથે તુ હ્યપમૃત્યુર્ભવિષ્યતિ ॥ ૭૮॥

તદ્દોષપરિહારાર્થં વિષ્ણુસાહસ્રકં જપેત્ ।
તતઃ સુખમવાપ્નોતિ શ્રીહરેશ્ચ પ્રસાદતઃ ॥ ૭૯॥

અથ શુક્રાન્તર્દશાફલાધ્યાયઃ ॥ ૬૦॥

અથ સ્વાન્તર્ગતે શુક્રે લગ્નાત્કેન્દ્રત્રિકોણગે ।
લાભે વા બલસંયુક્તે તદ્ભુક્તૌ ચ શુભં ફલમ્ ॥ ૧॥

વિપ્રમૂલાદ્ધનપ્રાપ્તિર્ગોમહિષ્યાદિલાભકૃત્ ।
પુત્રોત્સવાદિસન્તોષો ગૃહે કલ્યાણસમ્ભવઃ ॥ ૨॥

સન્માનં રાજસમ્માનં રાજ્યલાભો મહત્સુખમ્ ।
સ્વોચ્ચે વા સ્વર્ક્ષગે વાપિ તુઙ્ગાંશે વાંશગેઽપિ વા ॥ ૩॥

નૂતનાલયનિર્માણં નિત્યં મિષ્ટાન્નભોજનમ્ ।
કલત્રપુત્રવિભવં મિત્રસંયુક્તભોજનમ્ ॥ ૪॥

અન્નદાનં પ્રિયં નિત્યં દનધર્માદિસઙ્ગ્રહઃ ।
મહારાજપ્રસાદેન વાહનામ્બરભૂષણમ્ ॥ ૫॥

વ્યવસાયાત્ફલાધિક્યં ચતુષ્પાજ્જીવલાભકૃત્ ।
પ્રયાણં પશ્ચિમે ભાગે વાહનામ્બરલાભકૃત્ ॥ ૬॥

લગ્નાદ્યુપચયે શુક્રે શુભગ્રહયુતેક્ષિતે ।
મિત્રાંશે તુઙ્ગલાભેશયોગલારકસંયુતે ॥ ૭॥

રાજ્યલાભો મહોત્સાહો રાજપ્રીતિઃ શુભાવહા ।
ગૃહે કલ્યાણસમ્પત્તિર્દારપુત્રાદિવર્દ્ધનમ્ ॥ ૮॥

ષષ્ઠાષ્ટમવ્યયે શુક્રે પાપયુક્તેઽથ વીક્ષિતે ।
ચૌરાદિવ્રણભીતિશ્ચ સર્વત્ર જનપીડનમ્ ॥ ૯॥

રાજદ્વારે જનદ્વેષ ઇષ્ટબન્ધુવિનાશનમ્ ।
દારપુત્રાદિપીડા ચ સર્વત્ર જનપીડનમ્ ॥ ૧૦॥

દ્વિતીયદ્યૂનનાથે તુ સ્થિતે ચેન્મરણં ભવેત્ ।
તર્ત દુર્ગાજપં કુર્યાદ્ધનુદાનં ચ કારયેત્ ॥ ૧૧॥

શુક્રસ્યાન્તર્ગતે સૂર્યે સન્તાપો રાજવિગ્રહઃ ।
દાયાદકલહશ્ચૈવ સ્વોચ્ચનીચવિવર્જિતે ॥ ૧૨॥

(શુક્રસ્યાન્તર્ગતે સૂર્યે સન્તાપો રાજભિઃ કલિઃ ।
દાયાદાત્ કલહશ્ચૈવ શુભક્ષેત્રાત્ય રાશિગે ॥ ૧૨॥) ।
સ્વોચ્ચે સ્વક્ષેત્રગે સૂર્યે મિત્રર્ક્ષે કેન્દ્રકોણગે ।
દાયેશાત્કેન્દ્રકોણે વા લાભે વા ધનગેઽપિ વા ॥ ૧૩॥

તદ્ભુક્તૌ ધનલાભઃ સ્યાદ્રાજ્યસ્ત્રીધનસમ્પદઃ ।
સ્વપ્રભોશ્ચ મહત્સૌખ્યમિષ્ટબન્ધોઃ સમાગમઃ ॥ ૧૪॥

પિતૃમાત્રોઃ સુખપ્રાપ્તિં ભ્રાતૃલાભં સુખાવહમ્ ।
સત્કીર્તિં સુખસૌભાગ્યં પુત્રલાભં ચ વિન્દતિ ॥ ૧૫॥

તથાષ્ટમે વ્યયે સૂર્યે રિપુરાશિસ્થિતેઽપિ વા ।
નીચે વા પાપવર્ગસ્થે દેહતાપો મનોરુજઃ ॥ ૧૬॥

સ્વજનોપરિસંક્લેશો નિત્યં નિષ્ઠુરભાષણમ્ ।
પિતૃપીડા બન્ધુહાની રાજદ્વારે વિરોધકૃત્ ॥ ૧૭॥

વ્રણપીડાહિબાધા ચ સ્વગૃહે ચ ભયં તથા ।
નાનારોગભયં ચૈવ ગૃહક્ષેત્રાદિનાશનમ્ ॥ ૧૮॥

સપ્તમાધિપતૌ સૂર્યે ગ્રહબાધા ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં સૂર્યપ્રીતિં ચ કારયેત્ ॥ ૧૯॥

શુક્રસ્યાન્તર્ગતે ચન્દ્રે કેન્દ્રલાભત્રિકોણગે ।
સ્વોચ્ચે સ્વક્ષેત્રગે ચૈવ ભાગ્યનાથેનસંયુતે ॥ ૨૦॥

શુભયુક્તે પૂર્ણચન્દ્રે રાજ્યનાથેન સંયુતે ।
તદ્ભુક્તૌ વાહનાદીનાં લાભં ગેહે મહત્સુખમ્ ॥ ૨૧॥

મહારાજપ્રસાદેન ગજાન્તૈશ્વર્યમાદિશેત્ ।
મહાનદીસ્નાનપુણ્યં દેવબ્રાહ્મણપૂજનમ્ ॥ ૨૨॥

ગીતવાદ્યપ્રસઙ્ગાદિવિદ્વજ્જનવિભૂષણમ્ ।
ગોમહિષ્યાદિવૃદ્ધિશ્ચ વ્યવસાયેઽધિકં ફલમ્ ॥ ૨૩॥

ભોજનામ્બરસૌખ્યં ચ બન્ધુસંયુક્તભોજનમ્ ।
નીચે વાત્સઙ્ગતે વાપિ ષષ્ઠાષ્ટમવ્યયરાશિગે ॥ ૨૪॥

દાયેશાત્ષષ્ઠગે વાપિ રન્ધ્રે વા વ્યયરાશિગે ।
તત્કાલે ધનનાશઃ સ્યાત્સઞ્ચરેત મહદ્ભયમ્ ॥ ૨૫॥

દેહાયાસો મનસ્તાપો રાજદ્વારે વિરોધકૃત્ ।
વિદેશગમનં ચૈવ તીર્થયાત્રાદિકં ફલમ્ ॥ ૨૬॥

દારપુત્રાદિ પીડા ચ નિજબન્ધુવિયોગકૃત્ ।
દાયેશાત્કેન્દ્રલાભસ્થે ત્રિકોણે સહજેઽપિ વા ॥ ૨૭॥

રાજપ્રીતિકરી ચૈવ દેશગ્રામાધિપત્યતા ।
ધૈર્યં યશઃ સુખં કીર્તિર્વાહનામ્બરભૂષણમ્ ॥ ૨૮॥

કૂપારામતડાગદિનિર્માણં ધનસઙ્ગ્રહઃ ।
ભુક્તયાદૌ દેહસૌખ્યં સ્યાદન્તે ક્લેશસ્તથા ભવેત્ ॥ ૨૯॥

શુક્રસ્યાન્તર્ગતે ભૌમે લગ્નાત્કેન્દ્રત્રિકોણગે ।
સ્વોચ્ચે વા સ્વર્ક્ષગે ભૌમે લાભે વા બલસંયુતે ॥ ૩૦॥

લગ્નાધિપેન સંયુક્તે કર્મભાગ્યેશસંયુતે ।
તદ્ભુક્તૌ રાજયોગાદિસમ્પદં શોભનાં વદેત્ ॥ ૩૧॥

વસ્ત્રાભરણભૂમ્યાદેરિષ્ટસિદ્ધિઃ સુખાવહા ।
તથાઽષ્ટમે વ્યયે વાઽપિ દાયેશાદ્વા તથૈવ ચ ॥ ૩૨॥

શીતજ્વરાદિપીડા ચ પિતૃમાતૃભયાવહા ।
જ્વરાદ્યધિકરોગાશ્ચ સ્થાનભ્રંશો મનોરુજા ॥ ૩૩॥

સ્વબન્ધુજનહાનિશ્ચ કલહો રાજવિગ્રહઃ ।
રાજદ્વારજનદ્વેષો ધનધાન્યવ્યયોઽધિકઃ ॥ ૩૪॥

વ્યવસાયાત્ફલં નેષ્ટં ગ્રામભૂમ્યાદિહાનિકૃત્ ।
દ્વિતીયદ્યૂનનાથે તુ દેહવાધા ભવિષ્યતિ ॥ ૩૫॥

શુક્રસ્યાન્તર્ગતે રાહૌ કેન્દ્રલાભત્રિકોણગે ।
સ્વોચ્ચે વા શુભસંદૃષ્ટે યોગકારકસંયુતે ॥ ૩૬॥

તદ્ભુક્તૌ બહુસૌખ્યં ચ ધનધાન્યાદિલાભકૃત્ ।
ઇષ્ટબન્ધુસમાકીર્ણં ભવનં ચ સમાદિશેત્ ॥ ૩૭॥

યાતુઃ કાર્યાર્થસિદ્ધિઃ સ્યાત્ પશુક્ષેત્રાદિસમ્ભવઃ ।
લગ્નાદ્યુપચયે રાહૌ તદ્ભુક્તિઃ સુખદા ભવેત્ ॥ ૩૮॥

શત્રુનાશો મહોત્સાહો રાજપ્રીતિકરી શુભા ।
ભુક્ત્યાદૌ શરમાસાંશ્ચ અન્તે જ્વરમજીર્ણકૃત્ ॥ ૩૯॥

કાર્યવિઘ્નમવાપ્નોતિ સઞ્ચરે ચ મનોવ્યથા ।
પરં સુખં ચ સૌભાગ્યં મહારાજ ઇવાઽશ્નુતે ॥ ૪૦॥

નૈરૃતીં દિશમાશ્રિત્ય પ્રયાણં પ્રભુદર્શનમ્ ।
યાતુઃ કાર્યાર્થસિદ્ધિઃ સ્યાત્સ્વદેશે પુનરેષ્યતિ ॥ ૪૧॥

ઉપકારો બ્રાહ્મણાનાં તીર્થયાત્રાફલં ભવેત્ ।
દાયેશાદ્રન્ધ્રભાવસ્થે વ્યયે વા પાપસંયુતે ॥ ૪૨॥

અશુભં લભતે કર્મ પિતૃમાતૃજનાવધિ ।
સર્વત્ર જનવિદ્વેષં નાનારૂપં દ્વિજોત્તમ ॥ ૪૩॥

દ્વિતીયે સપ્તમે વાપિ દેહાલસ્ય વિનિર્દિશેત્ ।
તદ્દોષપરિહારાર્થં મૃત્યુઞ્જયજપં ચરેત્ ॥ ૪૪॥

શુક્રસ્યાન્તર્ગતે જીવે સ્વોચ્ચે સ્વક્ષેત્રકેન્દ્રગે ।
દાયેશાચ્છુભરાશિસ્થે ભાગ્યે વા પુત્રરાશિગે ॥ ૪૫॥

નષ્ટરાજ્યાદ્ધનપ્રાપ્તિમિષ્ટાર્થામ્બરસમ્પદમ્ ।
મિત્રપ્રભોશ્ચ સન્માનં ધનધાન્યં લભેન્નરઃ ॥ ૪૬॥

રાજસમ્માનકીર્તિં ચ અશ્વાન્દોલાદિલાભકૃત્ ।
વિદ્વત્પ્રભુસમાકીર્ણં શાસ્ત્રાપરિશ્રમમ્ ॥ ૪૭॥

પુત્રોત્સવાદિસન્તોષમિષ્ટબન્ધુસમાગમમ્ ।
પિતૃમાતૃસુખપ્રાપ્તિં પુત્રાદિસૌખ્યમાદિશેત્ ॥ ૪૮॥

દાયેશાત્ષષ્ઠરાશિસ્થે વ્યયે વા પાપસંયુતે ।
રાજચૌરાદિપીડા ચ દેહપીડા ભવિષ્યતિ ॥ ૪૯॥

આત્મરુગ્બન્ધુકષ્ટં સ્યાત્કલહેન મનોવ્યથા ।
સ્થાનચ્યુતિં પ્રવાસં ચ નાનારોગં સમાપ્નુયાત્ ॥ ૫૦॥

દ્વિતીયસપ્તમાધીશે દેહબાધા ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં મહામૃત્યુઞ્જયં ચરેત્ ॥ ૫૧॥

શુક્રસ્યાન્તર્ગતે મન્દે સ્વોચ્ચે તુ પરમોચ્ચગે ।

સ્વર્ક્ષકેન્દ્રત્રિકોણસ્થે તુઙ્ગાંશે સ્વાંશગેઽપિ વા ॥ ૫૨॥

તદ્ભુક્તૌ બહુસૌખ્યં સ્યાદિષ્ટબન્ધુસમાગમઃ ।
રાજદ્વારે ચ સમ્માનં પુત્રિકાજન્મસમ્ભવઃ ॥ ૫૩॥

પુણ્યતીર્થફલવાપ્તિર્દાનધર્માદિપુણ્યકૃત્ ।
સ્વપ્રભોશ્ચ પદાવાપ્તિઃ નીચસ્થે ક્લેશભાગ્યભવેત્ ॥ ૫૪॥

દેહાલસ્યમવાપ્નોતિ તથાઽયાદધિકવ્યયમ્ ।
તથાષ્ટમે વ્યયે મન્દે દાયેશાદ્વા તથૈવ ચ ॥ ૫૫॥

ભુક્ત્યાદૌ વિવિધા પીડા પિતૃમાતૃજનાવધિ ।
દારપુત્રાદિપીડા ચ પરદેશાદિવિભ્રમઃ ॥ ૫૬॥

વ્યવસાયાત્ફલં નષ્ટં ગોમહિષ્યાદિહાનિકૃત્ ।
દ્વિતીયસપ્તમાધીશે દેહબાધા ભવિષ્યતિ ॥ ૫૭॥

તદ્દોષપરિહારાર્થં તિલહોમં ચ કારયેત્ ।
મૃત્યુઞ્જયજપં કુર્યાચ્ચણ્ડીપાઠમાથપિ વા ॥ ૫૮॥

સ્વયં વા બ્રાહ્મણદ્વારા યથાશક્તિ યથાવિધિ ।
તતઃ શાન્તિમવાપ્નોતિ શિવાશમ્ભુપ્રસાદતઃ ॥ ૫૯॥

શુક્રસ્યાન્તર્ગતે સૌમ્યે કેન્દ્રે લાભત્રિકોણગે ।
સ્વોચ્ચે વા સ્વર્ક્ષગે વાપિ રાજપ્રીતિકરં શુભમ્ ॥ ૬૦॥

સૌભાગ્યં પુત્રલાભશ્ચ સન્માર્ગેણ ધનાગમઃ ।
પુરાણધર્મશ્રવણં શૃઙ્ગારિજનસંગમઃ ॥ ૬૧॥

ઇષ્ટબન્ધુજનાકીર્ણં શોભિતં તસ્ય મન્દિરમ્ ।
સ્વપ્રભોશ્ચ મહત્સૌખ્યં નિત્યં મિષ્ટાન્નભોજનમ્ ॥ ૬૨॥

દાયેશાત્ષષ્ઠરન્ધ્રે વા વ્યયે વા બલવર્જિતે ।
પાપદૃષ્ટે પાપયુક્તે ચતુષ્પાજ્જીવહાનિકૃત્ ॥ ૬૩॥

અન્યાલયનિવાસશ્ચ મનોવૈકલ્યસમ્ભવઃ ।
વ્યાપારેષુ ચ સર્વેષુ હાનિરેવ ન સંશયઃ ॥ ૬૪॥

ભુક્ત્યાદૌ શોભનં પ્રોક્તં મધ્યે મધ્યફલં દિશેત્ ।
અન્તે ક્લેશકરં ચૈવ શીતવાતજ્વરાદિકમ્ ॥ ૬૫॥

સપ્તમાધીશદોષેણ દેહપીડા ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં વિષ્ણુસાહસ્રકં જપેત્ ॥ ૬૬॥

શુક્રસ્યાન્તર્ગતે કેતૌ સ્વોચ્ચે વા સ્વર્ક્ષગેઽપિ વા ।
યોગકારકસમ્બન્ધે સ્થાનવીર્યસમન્વિતે ॥ ૬૭॥

ભુક્ત્યાદૌ શુભમાધિક્યાન્નિત્યં મિષ્ટાન્નભોજનમ્ ।
વ્યવસાયાત્ફલાધિક્યં ગોમહિષ્યાદિવૃદ્ધિકૃત્ ॥ ૬૮॥

ધનધાન્યસમૃદ્ધિશ્ચ સંગ્રામે વિજયો ભવેત્ ।
ભુક્ત્યન્તે હિ સુખં ચૈવ ભુક્ત્યાદૌ મધ્યમં ફલમ્ ॥ ૬૯॥

મધ્યે મધ્યે મહત્કષ્ટં પશ્ચાદારોગ્યમાદિશેત્ ।
દાયેશાદ્રન્ધ્રભાવસ્થે વ્યયે વા પાપસંયુતે ॥ ૭૦॥

ચૌરાહિવ્રણપીડા ચ બુદ્ધિનાશો મહદ્ભયમ્ ।
શિરોરુજં મનસ્તાપમકર્મકલહં વદેત્ ॥ ૭૧॥

પ્રમેહભવરોગં ચ નાનામાર્ગે ધનવ્યયઃ ।
ભાર્યાપુત્રવિરોધશ્ચ ગમનં કાર્યનાશનમ્ ॥ ૭૨॥

દ્વિતીયદ્યૂનનાથે તુ દેહબાધા ભવિષ્યતિ ।
તદ્દોષપરિહારાર્થં મૃત્યુઞ્જયજપં ચરેત્ ॥ ૭૩॥

છાગદાનં પ્રકુર્વીત સર્વસમ્પત્પ્રદાયકમ્ ।
શુક્રપ્રીતિકરીં શાન્તિં તતઃ સુખમવાપ્નુયાત્ ॥ ૭૪॥

Encoded and proofread by ajarve at fms30.cca.rockwell.com (Ahto Jarve)

*bRihatpArAsharahorAshAstramh 51-60*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*